ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणम्

## प्रथमाष्टके प्रपाठकः 5 to 8

# Version Notes:

**This is now the current Version 1.2 dated June 30, 2021.**

1. This replaces the earlier version 1.1 dated Oct 31, 2020.
2. This version has been updated with the errors found and reported till June 30, 2021.
3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.
4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

# Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 10th October 2017 |
| 2nd | Version Number | 1.0 dated 30th November 2019 |
| 3rd | Version Number | 1.1 dated 31st October 2020 |

## Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टकं....................................6

1.5 प्रथमाष्टके पञ्चमः प्रपाठकः – नक्षत्रेष्टिकाण्डे ............................6

1.5.1 अनुवाकं 1– नक्षत्रेष्टकामन्त्राः, विकृतिरूपचयनगताः.........................6

1.5.2 अनुवाकं 2 – कर्मानुष्ठानार्हः नक्षत्ररूपः पुण्यकालः .........................8

1.5.3 अनुवाकं 3 – कर्मानुष्ठानार्हः दिवसभागरूपः हेयोपादेयकाल विभागः.........................12

1.5.4 अनुवाकं 4 – सोमशेषभूता पात्रस्तुतिः.(आध्वरब्राह्मणशेषः)......14

1.5.5 अनुवाकं 5 – चातुर्मास्यशेषा वपनमन्त्राः, (राजसूयब्राह्मणम्)...15

1.5.6 अनुवाकं 6 – चातुर्मास्यशेषा वपनविधिः (राजसूयब्राह्मणम्) ....18

1.5.7 अनुवाकं 7 – अग्निचयनशेषा इष्टकोपधानमन्त्राः, तत्र संतत्याख्येष्टकामन्त्राः.........................21

1.5.8 अनुवाकं 8 – अग्निचयनशेषा थर्वशिरोऽभिधानानामिष्टकानां मन्त्राः.........................22

1.5.9 अनुवाकं 9 – सोमशेषभूता इष्टयः. (आध्वरब्राह्मणम्).................23

1.5.10 अनुवाकं 10 – त्रिवृदादिस्तोमरूपाणि सोमङ्गानि. (आध्वरब्राह्मणम्).........................27

1.5.11 अनुवाकं 11 – सवनीयपशुपुरोडाशाः (आध्वरब्राह्मणम्).............30

1.5.12 अनुवाकं 12 – सप्तछन्दांसि प्रपञ्च्यन्ते (आध्वरब्राह्मणम्)........33

1.6 प्रथमाष्टके षष्ठः प्रपाठकः – राजसूयानुब्राह्मणं ............ 39
1.6.1 अनुवाकं 1 – अनुमत्याद्या इष्टयः ............ 39
1.6.2 अनुवाकं 2– चातुर्मास्ये वैश्वदेवहवींषि ............ 43
1.6.3 अनुवाकं 3 – वैश्वदेवपर्गतानि विश्वेषाङ्गानि ............ 46
1.6.4 अनुवाकं 4 – वरुणप्रघासाः ............ 50
1.6.5 अनुवाकं 5 – तच्छेषः ............ 53
1.6.6 अनुवाकं 6 – साकमेधाः ............ 55
1.6.7 अनुवाकं 7 – तच्छेषः ............ 58
1.6.8 अनुवाकं 8 – पितृयज्ञः ............ 61
1.6.9 अनुवाकं 9 – तच्छेषः ............ 65
1.6.10 अनुवाकं 10 – त्र्यम्बकहवींषि ............ 69
1.7 प्रथमाष्टके सप्तमः प्रपाठकः – राजसूयानुब्राह्मणं ............ 74
1.7.1 अनुवाकं 1 – शुनासीरीयेन्द्रतुरीयपञ्चावत्तीयापामार्गहोमाः ............ 74
1.7.2 अनुवाकं 2 – देविकावहवींषि ............ 77
1.7.3 अनुवाकं 3 – रत्निनां हवींषि ............ 80
1.7.4 अनुवाकं 4 – देवसुवां हवींषि ............ 83
1.7.5 अनुवाकं 5 – अभिषेकार्थमपांग्रहग्रहणम् ............ 85
1.7.6 अनुवाकं 6 – अभिषेकार्थजलसंस्कारः ............ 87

1.7.7 अनुवाकं 7 – दिग्व्यास्थापनम् ........ 91

1.7.8 अनुवाकं 8 – अभिषेकः ........ 93

1.7.9 अनुवाकं 9 – स्थारोहणम्. विजयः ........ 96

1.7.10 अनुवाकं 10 – आसने समुपवेशः सर्वैस्सेव्यत्वं च ........ 99

1.8 प्रथमाष्टके अष्टमः प्रपाठकः – राजसूयानुब्राह्मणं ........ 105

1.8.1 अनुवाकं 1 – संसृपां हवींषि दश ........ 105

1.8.2 अनुवाकं 2 – दशपेयः ........ 106

1.8.3 अनुवाकं 3 – दिशामवेष्टयः, पशुबन्धः, सात्यदूतहवींषि च ........ 108

1.8.4 अनुवाकं 4 – प्रयुजां हवींषि द्वादश ........ 110

1.8.5 अनुवाकं 5 – सौत्रामणिः, पशवः, हवींषि च ........ 111

1.8.6 अनुवाकं 6 – सौत्रामणिः, पशवः, हवींषि च ........ 114

1.8.7 अनुवाकं 7 – राजसूयस्याग्रे कर्तव्यं पवित्राख्यमग्निष्टोममहः ........ 116

1.8.8 अनुवाकं 8 – अभिषेचनीये साममन्त्रविशेषः ........ 117

1.8.9 अनुवाकं 9 – अभिषेचनीयविषययो रुक्मयोः स्तुतिः ........ 119

1.8.10 अनुवाकं 10 – व्युष्टिद्विरात्रं राजसूयान्ते कर्तव्यम् ........ 120

==========================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 1. कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टकं

## 1.5 प्रथमाष्टके पञ्चमः प्रपाठकः – नक्षत्रेष्टिकाण्डे

### 1.5.1 अनुवाकं 1– नक्षत्रेष्टकामन्त्राः, विकृतिरूपचयनगताः

**T.B.1.5.1.1**

अग्नेः कृत्तिकाः । शुक्रं परस्ता–ज्ज्योति–रवस्तात् ॥

पजापते रोहिणी । आपः परस्तादोषधयो ऽवस्तात् ॥

सोमस्येन्वका विततानि । परस्ताद्वयन्तो ऽवस्तात् ॥

रुद्रस्य बाहू । मृगयवः परस्ताद्विक्षारोऽवस्तात् ॥ अदित्यै पुनर्वसू ।

वातः परस्तादार्द्र–मवस्तात् ॥ **1 (10)**

**T.B.1.5.1.2**

बृहस्पतेस्तिष्यः । जुह्वतः परस्ताद्–यजमाना अवस्तात् ॥

सर्पाणा–माश्रेषाः । अभ्यागच्छन्तः परस्तादभ्यानृत्यन्तोऽवस्तात् ॥

पितृणां मघाः । रुदन्तः परस्तादपभ्रꣳशोऽवस्तात् ॥

अर्यम्णः पूर्वे फल्गुनी । जाया परस्तादृषभोऽवस्तात् ॥

भगस्योत्तरे । वहतवः परस्ताद्वहमाना अवस्तात् ॥ **2 (10)**

**T.B.1.5.1.3**

देवस्य सवितुर्. हस्तः । प्रसवः परस्ताथ्–सनिरवस्तात् ॥

इन्द्रस्य चित्रा । ऋतं परस्ताथ्–सत्य–मवस्तात् ॥

वायोर्–निष्ट्या व्रततिः । परस्ता–दसिद्धि–रवस्तात् ॥

इन्द्राग्नियोर् विशाखे । युगानि परस्तात्–कृषमाणा अवस्तात् ॥

मित्रस्या–नूराधाः ।

अभ्यारोहत्–परस्ता–दभ्यारूढ–मवस्तात् ॥ **3 (10)**

**T.B.1.5.1.4**

इन्द्रस्य रोहिणी । शृणत्–परस्तात्–प्रतिशृण–दवस्तात् ॥

निर्.ऋत्यै–मूलवर्.हणी ।

प्रतिभञ्जन्तः परस्तात्–प्रतिशृणन्तोऽवस्तात् ॥

अपां पूर्वा अषाढाः । वर्चः परस्ताथ्–समिति–रवस्तात् ॥

विश्वेषां देवाना–मुत्तराः । अभिजयत्–परस्ता–दभिजित–मवस्तात् ॥

विष्णोः श्रोणा पृच्छमानाः । परस्तात्–पन्था अवस्तात् ॥ **4 (10)**

**T.B.1.5.1.5**

वसूना॒ श्रविष्ठाः । भूतं परस्ताद्–भूतिरवस्तात् ॥

इन्द्रस्य–शतभिषक् । विश्वव्यचाः परस्ताद्–विश्वक्षिति–रवस्तात् ॥

अजस्यैकपदः पूर्वे प्रोष्ठपदाः ।

वैश्वानरं परस्ताद्–वैश्वावसव–मवस्तात् ॥ अहेर्बुध्निय–स्योत्तरे ।

अभिषिञ्चन्तः परस्ता–दभिषुण्वन्तोऽवस्तात् ॥ पूष्णो रेवती ।

गावः परस्ताद्–वथ्सा अवस्तात् ( ) ॥ अश्विनोरश्वयुजौ ।

ग्रामः परस्ताथ्सेना ऽवस्तात् ॥

यमस्यापभरणीः । अपकर्.षन्तः परस्ता–दपवहन्तोऽवस्तात् ॥

“पूर्णा–पश्चाद्{1}”, “यत्ते देवा अदधुः{2}” ॥ **5 (15)**

*(आर्द्रमवस्ताद् – वहमाना अवस्ता – दभ्यारूढमवस्तात् – पन्था अवस्ताद् – वथ्सा अवस्तात् पञ्च च) (A1)*

## 1.5.2 अनुवाकं 2 – कर्मानुष्ठानार्हः नक्षत्ररूपः पुण्यकालः

**T.B.1.5.2.1**

यत् पुण्यं नक्षत्रम् । तद्–बट् कुर्वीतोपव्युषम् । यदा वै सूर्य उदेति ।

अथ नक्षत्रं नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत् ।

तावति कुर्वीत यत् कारी स्यात् । पुण्याह एव कुरुते ।

एवꣳ ह वै यज्ञेषुं च शतद्युम्नं च माथ्स्यो निरवसाययां चकार ॥ **6 (9)**

**T.B.1.5.2.2**

यो वै नक्षत्रियं प्रजापतिं वेँद । उभयोरेनं लोँकयोर्विदुः ।

हस्त एवास्य हस्तः । चित्रा शिरः । निष्ट्या हृदयम् ।

ऊरू विशाखे । प्रतिष्ठा ऽनूराधाः । एष वै नक्षत्रियः प्रजापतिः ।

य एवं वेँद । उभयोरेनं लोँकयोर्विदुः । **7 (10)**

**T.B.1.5.2.3**

अस्मिꣴश्चा–मुष्मिꣴश्च ॥ यां कामयेत दुहितरं प्रिया स्यादिति ।

तां निष्ट्यायां दद्यात् । प्रियैव भवति । नेव तु पुनरागच्छति ॥

अभिजिन्नाम नक्षत्रम् । उपरिष्टा–दषाढानाम् ।

अवस्ताच्छ्रोणायै । देवासुराः समँयत्ता आसन्न् ।

ते देवास्तस्मिन्–नक्षत्रेऽभ्यजयन्न् । **8 (10)**

**T.B.1.5.2.4**

यदभ्यजयन्न् । तदभिजितोऽभिजित्त्वम् ।

यं कामयेता–नपजय्यं जयेदिति । तमेतस्मिन्–नक्षत्रे यातयेत् ।

अनपजय्यमेव जयति ।
पापपराजितमिव तु ॥ प्रजापतिः पशूनसृजत ।
ते नक्षत्रं नक्षत्र–मुपातिष्ठन्त । ते समावन्त एवाभवन्न् ।
ते रेवती–मुपातिष्ठन्त । **9 (10)**

**T.B.1.5.2.5**

ते रेवत्यां प्राभवन्न् । तस्माद्–रेवत्यां पशूनां कुर्वीत ।
यत् किंचार्वाचीनꣳ सोमात् । प्रैव भवन्ति ॥
सलिलं ँवा इदमन्तरासीत् । यदतरन्न् । तत् तारकाणां तारकत्वम् ।
यो वा इह यजते । अमुꣳ सलोकं नक्षते ।
तन्नक्षत्राणां नक्षत्रत्वम् । **10 (10)**

**T.B.1.5.2.6**

देवगृहा वै नक्षत्राणि । य एवं ँवेद । गृह्येव भवति ॥
यानि वा इमानि पृथिव्याश्चित्राणि । तानि नक्षत्राणि ।
तस्मा–दश्लीलनामꣳ–श्चित्रे । नावस्येन्न यजेत ।
यथा पापाहे कुरुते । तादृगेव तत् ॥
देवनक्षत्राणि वा अन्यानि । **11 (10)**

**T.B.1.5.2.7**

यमनक्षत्राण्यन्यानि । कृत्तिकाः प्रथमम् । विशाखे उत्तमम् ।

तानि देवनक्षत्राणि । अनूराधाः प्रथमम् । अपभरणी–रुत्तमम् ।

तानि यमनक्षत्राणि । यानि देवनक्षत्राणि । तानि दक्षिणेन परियन्ति ।

यानि यमनक्षत्राणि । **12 (10)**

**T.B.1.5.2.8**

तान्युत्तरेण ॥ अन्वेषामराथ्स्मेति । तदनूराधाः ।

ज्येष्ठमेषा–मवधिष्मेति । तज्ज्येष्ठघ्नी । मूलमेषामवृक्षामेति ।

तन्–मूलवर्.हणी । यन्नासहन्त । तदषाढाः । यदश्लोणत् । **13 (10)**

**T.B.1.5.2.9**

तच्छ्रोणा । यदशृणोत् । तच्छ्रविष्ठाः । यच्छत–मभिषज्यन्न् ।

तच्छतभिषक् । प्रोष्ठपदेषूदयच्छन्त । रेवत्यामरवन्त ।

अश्वयुजोरयुञ्जत । अपभरणीष्व पावहन्न् ।

तानि वा एतानि यमनक्षत्राणि ( ) ॥ यान्येव देवनक्षत्राणि ।

तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते ॥ **14 (13)**

*(चका – रैवं वैँदोभयो रेनं लौँकयोर्विदु – रजयन् – रेवतीमुपातिष्ठन्त – नक्षत्रत्व – मन्यानि – यानि यमनक्षत्रा – ण्यश्लोणद् – यमनक्षत्राणि त्रीणि च) (A2)*

### 1.5.3 <u>अनुवाकं 3 – कर्मानुष्ठानार्हः दिवसभागरूपः हेयोपादेयकाल विभागः</u>

**<u>T.B.1.5.3.1</u>**

देवस्य सवितुः प्रातः प्रसवः प्राणः । वरुणस्य सायमासवोऽपानः ॥

यत् प्रतीचीनं प्रातस्तनात् । प्राचीन(ग्ं) संगवात् ।

ततो देवा अग्निष्टोमं निरमिमत । तत्–तदात्तवीर्यं निर्मार्गः ॥

मित्रस्य संगवः । तत्–पुण्यं तेजस्व्यहः ।

तस्मात्तर्.हि पशवः समायन्ति ॥ यत् प्रतीचीन(ग्ं) संगवात् । **15 (10)**

**<u>T.B.1.5.3.2</u>**

प्राचीनं मद्ध्यन्दिनात् । ततो देवा उक्थ्यं निरमिमत ।

तत्–तदात्तवीर्यं निर्मार्गः ॥ बृहस्पतेर् मद्ध्यन्दिनः ।

तत्–पुण्यं तेजस्व्यहः । तस्मात्तर्.हि तेक्ष्णिष्ठं तपति ॥

यत्–प्रतीचीनं मद्ध्यन्दिनात् । प्राचीन–मपराह्णात् ।

ततो देवाः षोडशिनं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः ॥ **16 (10)**

**T.B.1.5.3.3**

भगस्यापराह्णः । तत्–पुण्यं तेजस्व्यहः ।

तस्मादपराह्णे कुमार्यो भगमिच्छमाना–श्चरन्ति ॥

यत्–प्रतीचीनमपराह्णात् । प्राचीन९ँ सायात् ।

ततो देवा अतिरात्रं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः ॥

वरुणस्य सायम् । तत्–पुण्यं तेजस्व्यहः ।

तस्मात्तर्.हि नानृतं ँवदेत् ॥ **17 (10)**

**T.B.1.5.3.4**

ब्राह्मणो वा अष्टावि९ँशो नक्षत्राणाम् ।

समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि ।

तानि नव । यच्च परस्तान्नक्षत्राणां ँयच्चावस्तात् । तान्येकादश ।

ब्राह्मणो द्वादशः । य एवं ँविद्वान्थ् सँवथ्सरं ँव्रतं चरति ।

सँवथ्सरेणैवास्य व्रतं गुप्तं भवति ॥

समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि ( ) ।

चत्वार्यश्लीलानि । तानि नव । आग्नेयी रात्रिः । ऐन्द्रमहः ।

तान्येकादश । आदित्यो द्वादशः ।

य एवं ँविद्वान्थ् सम्ँवथ्सरं ँव्रतं चरति ।

सम्ँवथ्सरेणैवास्य व्रतं गुप्तं भवति ॥ **18 (18)**

*(संगवाथ् – षोडशिनं निरमिमत तत्तदात्तवीर्यं निर्मागो – वदेद् – भवति समानस्याहुः पञ्च पुण्यानि नक्षत्राण्यष्टौ च) (A3)*

**1.5.4 अनुवाकं 4 – सोमशेषभूता पात्रस्तुतिः.(आध्वरब्राह्मणशेषः)**

**T.B.1.5.4.1**

ब्रह्मवादिनो वदन्ति । कति पात्राणि यज्ञं ँवहन्तीति ।

त्रयोदशेति ब्रूयात् । स यद्ब्रूयात् । कस्तानि निरमिमीतेति ।

प्रजापतिरिति ब्रूयात् । स यद्ब्रूयात् ।

कुतस्तानि निरमिमीतेति । आत्मन इति ।

प्राणापानाभ्या–मेवोपाꣳ–श्वन्तर्यामौ निरमिमीत । **19 (10)**

**T.B.1.5.4.2**

व्यानादुपाꣳशु सवनम् । वाच ऐन्द्रवायवम् ।

दक्षक्रतुभ्यां मैत्रावरुणम् । श्रोत्रादाश्विनम् । चक्षुषः शुक्रा मन्थिनौ ।

आत्मन आग्रयणम् । अङ्गेभ्य उक्थ्यम् । आयुषो ध्रुवम् ।

प्रतिष्ठाया ऋतुपात्रे ॥ यज्ञं ँवाव तं प्रजापतिर् निरमिमीत ( ) ।

स निर्मितो नाद्ध्रियत समव्लीयत ।

स एतान् प्रजापति–रपिवापान–पश्यत् । तान्निरवपत् ।

तैर्वै स यज्ञमप्यवपत् । यदपिवापा भवन्ति ।

यज्ञस्य धृत्या असम्ँव्लयाय ॥ **20 (16)**

*(उपा॰श्वन्तर्यामौ निरमिमीता– मिमीत षट् च) (A4)*

### 1.5.5 अनुवाकं 5 – चातुर्मास्यशेषा वपनमन्त्राः, (राजसूयब्राह्मणम्)

**T.B.1.5.5.1**

ऋतमेव परमेष्ठि । ऋतं नात्येति किं चन । ऋते समुद्र आहितः ।

ऋते भूमिरिय॰ श्रिता । अग्निस्तिग्मेन शोचिषा ।

तप आक्रान्त–मुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा ।

ऋतेनास्य निवर्तये । सत्येन परिवर्तये । **21 (10)**

**T.B.1.5.5.2**

तपसाऽस्यानुवर्तये । शिवेनास्योपवर्तये ।

शग्मेनास्या–भिवर्तये । तदृतं तथ् सत्यम् ।

तद्–व्रतं तच्छकेयम् । तेन शकेयं तेन राद्ध्यासम् ॥

यद्–घर्मः पर्यवर्तयत् । अन्तान् पृथिव्या दिवः ।

अग्निरीशान ओजसा ।

वरुणो धीतिभिः सह । **22 (10)**

**T.B.1.5.5.3**

इन्द्रो मरुद्भिः सखिभिः सह ॥ अग्निस्तिग्मेन शोचिषा ।

तप आक्रान्त–मुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा ।

ऋतेनास्य निवर्तये । सत्येन परिवर्तये । तपसा ऽस्यानुवर्तये ।

शिवेनास्योपवर्तये । शग्मेनास्याभिवर्तये । **23 (10)**

**T.B.1.5.5.4**

तदृतं तथ् सत्यम् । तद्–व्रतं तच्छकेयम् ।

तेन शकेयं तेन राद्ध्यासम् ॥ यो अस्याः पृथिव्यास्त्वचि ।

निवर्तयत्योषधीः । अग्निरीशान ओजसा । वरुणो धीतिभिः सह ।

इन्द्रो मरुद्भिः सखिभिः सह ॥

अग्निस्तिग्मेन शोचिषा । तप आक्रान्त–मुष्णिहा । **24 (10)**

**T.B.1.5.5.5**

शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये ।

सत्येन परिवर्तये । तपसा ऽस्यानुवर्तये । शिवेनास्योपवर्तये ।

शग्मेनास्या–भिवर्तये । तदृतं तथ् सत्यम् ।

तद्–व्रतं तच्छकेयम् । तेन शकेयं तेन राद्ध्यासम् ॥ **25 (10)**

**T.B.1.5.5.6**

एकं मास–मुदसृजत् । परमेष्ठी प्रजाभ्यः । तेनाभ्यो मह आवहत् ।

अमृतं मर्त्याभ्यः । प्रजामनु प्रजायसे । तदु ते मर्त्यामृतम् ।

येन मासा अर्द्धमासाः । ऋतवः परिवथ्सराः । येन ते ते प्रजापते ।

ईजानस्य न्यवर्तयन्न् । **26 (10)**

**T.B.1.5.5.7**

तेनाहमस्य ब्रह्मणा । निवर्तयामि जीवसे ॥ अग्निस्तिग्मेन शोचिषा ।

तप आक्रान्त–मुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा ।

ऋतेनास्य निवर्तये । सत्येन परिवर्तये । तपसा ऽस्यानुवर्तये ।

शिवेनास्योपवर्तये ( ) । शग्मेनास्याभिवर्तये । तदृतं तथ्–सत्यम् ।

तद्–व्रतं तच्छकेयम् । तेन शकेयं तेन राद्ध्यासम् ॥ **27 (14)**

*(परिवर्तये – सहा – भिवर्तय – उष्णिहा – राद्ध्यासं –*

*न्यवर्तयन् – नुपवर्तये चत्वारि च) (A5)*

## 1.5.6 अनुवाकं 6 – चातुर्मास्यशेषा वपनविधिः (राजसूयब्राह्मणम्)

**T.B.1.5.6.1**

देवा वै यद्–यज्ञे ऽकुर्वत । तदसुरा अकुर्वत ।

तेऽसुरा ऊर्द्ध्वं पृष्ठेभ्यो नापश्यन्न् । ते केशानग्रेऽवपन्त ।

अथ श्मश्रूणि । अथोपपक्षौ । ततस्तेऽवाञ्च आयन्न् । पराऽभवन्न् ।

यस्यैवं ँवपन्ति । अवाङेति । **28 (10)**

**T.B.1.5.6.2**

अथो परैव भवति । अथ देवा ऊर्द्ध्वं पृष्ठेभ्योऽपश्यन्न् ।

त उपपक्षावग्रेऽवपन्त । अथ श्मश्रूणि ।

अथ केशान् । ततस्तेऽभवन्न् ।

सुवर्गं ँलोकमायन्न् । यस्यैवं ँवपन्ति । भवत्यात्मना ।

अथो सुवर्गं ँलोकमेति ॥ **29 (10)**

**T.B.1.5.6.3**

अथैतन्–मनुर्–वप्त्रे मिथुन–मपश्यत् । स श्मश्रूण्यग्रेऽवपत ।

अथोपपक्षौ । अथ केशान् । ततो वै स प्राजायत प्रजया पशुभिः ।

यस्यैवं ँवपन्ति । प्र प्रजया पशुभिर्–मिथुनैर् जायते ॥

देवासुराः सम्ँयत्ता आसन्न् । ते सम्ँवथ्सरे व्यायच्छन्त ।

तान् देवाश्चातुर्–मास्यैरेवाभि प्रायुञ्जत । **30 (10)**

**T.B.1.5.6.4**

वैश्वदेवेन चतुरो मासोऽवृञ्जतेन्द्रराजानः ।

ताञ्छीर्.षन्नि चावर्तयन्त परि च ।

वरुण प्रघासै–श्चतुरो मासोऽवृञ्जत वरुणराजानः ।

ताञ्छीर्.षन्नि चावर्तयन्त परि च ।

साकमेधैश्चतुरो मासोऽवृञ्जत सोमराजानः ।

ताञ्छीर्.षन्नि चावर्तयन्त परि च ।

या सम्ँवथ्सर उपजीवा ऽऽसीत् । तामेषा–मवृञ्जत ।

ततो देवा अभवन्न् । पराऽसुराः । **31 (10)**

**T.B.1.5.6.5**

य एवं ँविद्वा७–श्चातुर्मास्यैर्–यजते । भ्रातृव्यस्यैव मासो वृक्त्वा ।

शीर्.षन्नि च वर्तयते परि च । यैषा सम्ँवथ्सर उपजीवा ।

वृङ्क्ते तां भ्रातृव्यस्य । क्षुधा ऽस्य भ्रातृव्यः परा भवति ॥

लोहितायसेन निवर्तयते । यद्वा इमामग्निर्. ऋतावागते निवर्तयति ।

एतदेवैना॒ꣳ रूपं कृत्वा निवर्तयति ।

सा ततः श्वः श्वो भूयसी भवन्त्येति । **32 (10)**

**T.B.1.5.6.6**

प्रजायते । य एवं ँविद्वाँल्लोहितायसेन निवर्तयते ।

एतदेव रूपं कृत्वा निवर्तयते । स ततः श्वः श्वो भूयान्–भवन्नेति ।

प्रैव जायते ॥ त्रेण्या शलल्या निवर्तयेत ।

त्रीणि त्रीणि वै देवानामृद्धानि । त्रीणि छन्दाꣳसि । त्रीणि सवनानि ।

त्रय इमे लोकाः । **33 (10)**

**T.B.1.5.6.7**

ऋद्ध्यामेव तद्–वीर्य एषु लोकेषु प्रति तिष्ठति ॥

यच्चातुर्मास्यया–ज्यात्मनो नावद्येत् । देवेभ्य आवृश्च्येत ।

चतृषु चतृषु मासेषु निवर्तयेत ।

परोक्षमेव तद्–देवेभ्य आत्मनोऽवद्यत्यना व्रस्काय ॥

देवानां ँवा एष आनीतः । यश्चातुर्मास्ययाजी ।

य एवं ँविद्वान्नि च वर्तयते परि च । देवता एवाप्येति ।
नास्य रुद्रः प्रजां पशू–नभिमन्यते ( ) ॥ **34 (10)**

*(एत्ये– त्य – युञ्जता – सुरा – एति – लोका – मन्यते) (A6)*

### 1.5.7 अनुवाकं 7 – अग्निचयनशेषा इष्टकोपधानमन्त्राः, तत्र संतत्याख्येष्टकामन्त्राः

**T.B.1.5.7.1**

आयुषः प्राण॑ सन्तनु । प्राणादपान॑ सन्तनु ।
अपानाद् व्यान॑ सन्तनु । व्यानाच्चक्षुः सन्तनु ।
चक्षुषः श्रोत्र॑ सन्तनु ।
श्रोत्रान् मनः सन्तनु । मनसो वाच॑ सन्तनु ।
वाच आत्मान॑ सन्तनु । आत्मनः पृथिवी॑ सन्तनु ।
पृथिव्या अन्तरिक्ष॑ सन्तनु ( ) । अन्तरिक्षाद्–दिव॑ सन्तनु ।
दिवः सुवः सन्तनु ॥ **35 (12)**

*(अन्तरिक्ष॑ सन्तनु द्वे च) (A7)*

## 1.5.8 अनुवाकं 8 – अग्निचयनशेषा थर्वशिरोऽभिधानानामिष्टकानां मन्त्राः

**T.B.1.5.8.1**

इन्द्रो दधीचो अस्थभिः । वृत्राण्य प्रतिष्कुतः । जघान नव तीर्नव ॥

इच्छन्नश्वस्य यच्छिरः । पर्वतेष्वप श्रितम् । तद्–विदच्छर्यणावति ॥

अत्रा ह गोरमन्वत । नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥

इन्द्रमिद्गाथिनो बृहत् । 36 (10)

**T.B.1.5.8.2**

इन्द्रमर्केभिरर्किणः । इन्द्रं ँवाणीरनूषत ॥ इन्द्र इद्धर्योः सचा ।

संमिश्ल आवचो युजा । इन्द्रो वज्री हिरण्ययः ॥

इन्द्रो दीर्घाय चक्षसे । आ सूर्यꣳ रोहयद्–दिवि ।

वि गोभिरद्रिमैरयत् ॥ इन्द्र वाजेषु नो अव ।

सहस्र प्रधनेषु च । 37 (10)

**T.B.1.5.8.3**

उग्र उग्राभिरूतिभिः ॥ तमिन्द्रं ँवाजयामसि । महे वृत्राय हन्तवे ।

स वृषा वृषभो भुवत् ॥ इन्द्रः सदामने कृतः ।

ओजिष्ठः स बले हितः । द्युम्नी श्लोकी स सौम्यः ॥

गिरा वज्रो न संभृतः । सबलो अनपच्युतः ।

ववक्षु–रुग्रो अस्तृतः ( ) ॥ **38 (10)**

*(बृह– च्चा – स्तृतः) (A8)*

**1.5.9 अनुवाकं 9 – सोमशेषभूता इष्टयः. (आध्वरब्राह्मणम्)**

**T.B.1.5.9.1**

देवासुराः सम्ँयत्ता आसन्न् ।

स प्रजापतिरिन्द्रं ज्येष्ठं पुत्रमप न्यधत्त ।

नेदेनमसुरा बलीयाꣳ सोऽहनन्निति । प्रह्लादो ह वै कायाधवः ।

विरोचनꣳ स्वं पुत्रमप न्यधत्त । नेदेनं देवा अहनन्निति ।

ते देवाः प्रजापति–मुपसमेत्योचुः । नाराजकस्य युद्धमस्ति ।

इन्द्रमन्विच्छामेति । तं ँयज्ञक्रतुभि–रन्वैच्छन्न् । **39 (10)**

**T.B.1.5.9.2**

तं ँयज्ञक्रतुभिर्नान्वविन्दन्न् । तमिष्टिभि–रन्वैच्छन्न् ।

तमिष्टिभि–रन्वविन्दन्न् । तदिष्टीना–मिष्टित्वम् । एष्टयो ह वै नाम ।

ता इष्टय इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

तस्मा एतमाग्नावैष्णव–मेकादशकपालं दीक्षणीयं निरवपन्न् ।

तदपद्रुत्यातन्वत । तान्पत्नी सम्ँयाजान्त उपानयन्न् । **40 (10)**

**T.B.1.5.9.3**

ते तदं तमेव कृत्वोदद्रवन्न् ॥ ते प्रायणीयमभि समारोहन्न् ।

तदपद्रुत्यातन्वत । ताञ्छम्ँय्वन्त उपानयन्न् ।

ते तदंतमेव कृत्वोदद्रवन्न् ॥ त आतिथ्यमभि समारोहन्न् ।

तदपद्रुत्यातन्वत । तानिडान्त उपानयन्न् । ते तदंतमेव कृत्वोदद्रवन्न् ।

तस्मा देता एतदन्ता इष्टयः संतिष्ठन्ते ॥ **41(10)**

**T.B.1.5.9.4**

एवꣳ हि देवा अकुर्वत । इति देवा अकुर्वत ।

इत्यु वै मनुष्याः कुर्वते ॥ ते देवा ऊचुः ।

यद्वा इदमुच्चैर्–यज्ञेन चराम ।

तन्नोऽसुराः पाप्माऽनुविन्दन्ति । उपाꣳशूपसदा चराम ।

तथा नोऽसुराः पाप्मा नानुवेथ्स्यन्तीति । त उपाꣳशूपसद–मतन्वत ।

तिस्र एव सामिधेनीरनूच्य । **42 (10)**

**T.B.1.5.9.5**

स्रुवेणाघार–माघार्य । तिस्रः पराची–राहुतीर्. हुत्वा ।
स्रुवेणोपसदं जुहवाञ्चक्रुः ।
उग्रं ँवचो अपावधीं त्वेषं ँवचो अपावधी॰ स्वाहेति ।
अशनयापिपासे ह वा उग्रं ँवचः ।
एनश्च वैरहत्यं च त्वेषं ँवचः ।
एत॰ ह वाव तच्चतुर्द्धाविहितं पाप्मानं देवा अपजघ्निरे ॥
तथो एवैतदेवं ँविद्यजमानः ।
तिस्र एव सामिधेनीरनूच्य । स्रुवेणाघार–माघार्य । **43 (10)**

**T.B.1.5.9.6**

तिस्रः पराचीराहुतीर्. हुत्वा । स्रुवेणोपसदं जुहोति ।
उग्रं ँवचो अपावधीं त्वेषं ँवचो अपावधी॰ स्वाहेति ।
अशनयापिपासे ह वा उग्रं ँवचः । एनश्च वैरहत्यं च त्वेषं ँवचः ।
एतमेव तच्चतुर्द्धा–विहितं पाप्मानं ँयजमानोऽपहते ॥
तेऽभिनीयैवाहः पशुमा–ऽलभन्त ।
अह्न एव तद्–देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे ।

तेनाभिनीयेव रात्रेः प्राचरन्न् ।

रात्रिया एव तद्–देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे ॥ **44 (10)**

**T.B.1.5.9.7**

तस्मादभिनीयैवाहः पशुमालभेत ।

अह्न एव तद्–यजमानो ऽवर्तिं पाप्मानं भ्रातृव्यानपनुदते ।

तेनाभिनीयेव रात्रेः प्रचरेत् ।

रात्रिया एव तद्–यजमानो ऽवर्तिं पाप्मानं भ्रातृव्यानपनुदते ॥

स एष उपवसथीये ऽहन्–द्विदेवत्यः पशुरालभ्यते ।

द्वयं ँवा अस्मिन् ँलोके यजमानः । अस्थि च मा॒ꣳसं च ।

अस्थि चैव तेन मा॒ꣳसं च यजमानः सꣳ स्कुरुते ॥

ता वा एताः पञ्च देवताः ।

अग्नीषोमा–वग्निर्–मित्रावरुणौ ( ) । **45 (10)**

**T.B.1.5.9.8**

पञ्चपञ्ची वै यजमानः । त्वङ्मा॒ꣳ सꣳस्नावास्थि मज्जा ।

एतमेव तत्पञ्चधा विहितमात्मानं ँवरुणपाशान्–मुञ्चति ।

भेषजतायै निर्वरुणत्वाय ॥ त॒ꣳ सप्तभि श्छन्दोभिः प्रातरह्वयन्न् ।

तस्माथ्सप्त चतुरुत्तराणि छन्दा॑ᳲसि प्रातरनुवाकेऽनूच्यन्ते ॥

तमेतयो–पसमेत्यो–पासीदन्न् । उपास्मै गायता नर इति ।

तस्मा देतया बहिष्पवमान उपसद्यः ॥ **46 (9)**

*(ऐच्छन् – ननय॒ – स्तिष्ठन्ते – ऽनूच्या – नूच्य स्रुवेणाघारमा घार्य – रात्रिया एव तद् देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे – मित्रावरुणौ – +नव च ) (A9)*

**Special Korvai**

**(देवा यजमानो देवा देवा यजमानो यजमानोऽलभन्त प्राचरँल्लभेत प्रचरेदालभन्तालभेत मृत्युमपजघ्निरे भ्रातृव्यान्)**

## 1.5.10 अनुवाकं 10 – त्रिवृदादिस्तोमरूपाणि सोमङ्गानि. (आध्वरब्राह्मणम्)

**T.B.1.5.10.1**

स समुद्र उत्तरतः प्राज्वलद्–भूम्यन्तेन । एष वाव स समुद्रः ।

यच्चात्वालः । एष उ वेव स भूम्यन्तः । यद्वेद्यन्तः ।

तदेतत्–त्रिशलं त्रिपूरुषम् । तस्मात्–तं त्रिवितस्तं खनन्ति ॥

स सुवर्णरजताभ्यां कुशीभ्यां परिगृहीत आसीत् ।

तं ँयदस्या अद्ध्यजनयन्न् । तस्मादादित्यः । **47 (10)**

**T.B.1.5.10.2**

अथ॒ यथ् सु॑वर्णरज॒ताभ्यां᳚ कु॒शीभ्यां॒ परि॑गृहीत॒ आसी᳚त् ।

साऽस्य॑ कौशि॒कता᳚ ॥ तं त्रि॒वृता॒ऽभि प्रास्तु॑वत । तं त्रि॒वृता ऽऽद॑दत ।

तं त्रि॒वृता ऽऽह॑रन्न् । याव॑ती त्रि॒वृतो॒ मात्रा᳚ ॥

तं प॑ञ्चद॒शेना॒भि प्रास्तु॑वत । तं प॑ञ्चद॒शेनाद॑दत ।

तं प॑ञ्चद॒शेना॑हरन्न् । याव॑ती पञ्चद॒शस्य॒ मात्रा᳚ । **48 (10)**

**T.B.1.5.10.3**

तꣳ स॑प्तद॒शेना॒भि प्रास्तु॑वत । तꣳ स॑प्तद॒शेनाद॑दत ।

तꣳ स॑प्तद॒शेना॑हरन्न् । याव॑ती सप्तद॒शस्य॒ मात्रा᳚ ।

तस्य॑ सप्तद॒शेन॑ ह्रि॒यमा॑णस्य॒ तेजो॒ हरो॑ऽपतत् ।

तमे॑कवि॒ꣳ॒ शेना॒भि प्रास्तु॑वत । तमे॑कवि॒ꣳ॒शेनाद॑दत ।

तमे॑कवि॒ꣳ॒शेना॑हरन्न् । याव॑त्येकवि॒ꣳ॒शस्य॒ मात्रा᳚ ॥

ते यत्-त्रि॒वृता᳚ स्तु॒वते᳚ । **49 (10)**

**T.B.1.5.10.4**

त्रि॒वृतै॒व तद्-यज॑मान॒माद॑दते । तं त्रि॒वृतै॒व ह॑रन्ति ।

याव॑ती त्रि॒वृतो॒ मात्रा᳚ । अ॒ग्निर्वै त्रि॒वृत् ।

या॒वद्वा अ॒ग्नेर्द॑हतो धू॒म उ॒देत्या॑नु॒व्येति॑ । ताव॑ती त्रि॒वृतो॒ मात्रा᳚ ।

अग्नेरेवैनं तत् । मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति ॥

अथ यत्पञ्चदशेन स्तुवते ।

पञ्चदशेनैव तद्–यजमान–माददते । **50 (10)**

**T.B.1.5.10.5**

तं पञ्चदशेनैव हरन्ति । यावती पञ्चदशस्य मात्रा ।

चन्द्रमा वै पञ्चदशः । एष हि पञ्चदश्यामपक्षीयते ।

पञ्चदश्या–मापूर्यते । चन्द्रमस एवैनं तत् ।

मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति ।

अथ यथ्सप्तदशेन स्तुवते । सप्तदशेनैव तद्–यजमानमाददते ।

तꣳ सप्तदशेनैव हरन्ति । **51 (10)**

**T.B.1.5.10.6**

यावती सप्तदशस्य मात्रा । प्रजापतिर्वै सप्तदशः ।

प्रजापतेरेवैनं तत् । मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति ।

अथ यदेकविꣳशेन स्तुवते । एकविꣳशेनैव तद्–यजमान–माददते ।

तमेकविꣳशेनैव हरन्ति । यावत्येकविꣳशस्य मात्रा ।

असौ वा आदित्य एकविꣳशः । आदित्यस्यैवैनं तत् । **52 (10)**

**T.B.1.5.10.7**

मात्रा॒ꣳ॒ सायुज्यꣳ॒ सलो॒कतां॒ गमयन्ति ॥ ते कु॒श्यौ । व्यघ्नन्न् ।
ते अहोरा॒त्रे अभवताम् । अह॒रेव सु॒वर्णा ऽभवत् । र॒ज॒ता रात्रिः ।
स यदादि॒त्य उ॒देति । ए॒ताम्॒एव तथ्सु॒वर्णां कु॒शीमनु॒ सम्ेति ।
अथ॒ यदस्त॒मेति । ए॒ताम्॒एव तद्–र॒जतां कु॒शीमनु॒ सम्ँविशति ( ) ॥
प्र॒ह्लादो ह॒ वै कायाध॒वः । वि॒रोच॒न॒ꣳ॒ स्वं पु॒त्रमुदास्यत् ।
स प्र॒दरोऽभवत् । तस्मात् प्र॒दरादु॒द॒कं नाचामेत् ॥ **53 (14)**

*(आ॒दि॒त्यः – पञ्च॒दश॒स्य मात्रा – स्तु॒वते – पञ्च॒दश॒नैव तद्*
*यजमा॒नमाददते – सप्त॒द॒श॒नैव हरन् – त्या॒दि॒त्यस्यै॒वैनन्त॒द्*
*विशति च॒त्वारि च) (A10)*

**1.5.11 अनुवाकं 11 – सवनीयपशुपुरोडाशाः (आध्वरब्राह्मणम्)**

**T.B.1.5.11.1**

ये वै च॒त्वा॒रः स्तोमाः । कृ॒तं तत् । अथ॒ ये पञ्च । कलि॒ः सः ।
तस्मा॒च्चतुष्टोमः । तच्चतुष्टोमस्य चतुष्टोम॒त्वम् ॥ तदाहुः ।
क॒त॒मानि॒ तानि॒ ज्योतीꣳ॒षि । य ए॒तस्य॒ स्तोमा॒ इति ।
त्रि॒वृत्–पञ्चद॒शः सप्तद॒श एकवि॒ꣳ॒शः । **54 (10)**

**T.B.1.5.11.2**

एतानि वाव तानि ज्योती॑ꣳषि । य एतस्य स्तोमाः॥ सो॒ऽब्रवीत् ।

सप्तदशेन ह्रियमाणो व्यलेशिषि । भिषज्यत मेति ।

तमश्विनौ धानाभि–रभिषज्यताम् । पूषा करम्भेण ।

भारती परिवापेण । मित्रावरुणौ पयस्यया ॥ तदाहुः । **55 (10)**

**T.B.1.5.11.3**

यदश्विभ्यां धानाः । पूष्णः करम्भः । भारत्यै परिवापः ।

मित्रावरुणयोः पयस्याऽथ ।

कस्मादेतेषाꣳ हविषामिन्द्रमेव यजन्तीति ।

एता ह्येनं देवता इति ब्रूयात् ।

एतैर्. हविर्भि–रभिषज्य॒–स्तस्मादिति ॥

तं ँवसवोऽष्टाकपालेन प्रातस्सवनेऽभिषज्यन्न् ।

रुद्रा एकादशकपालेन माद्ध्यन्दिने सवने ।

विश्वे देवा द्वादशकपालेन तृतीयसवने ॥ **56 (10)**

**T.B.1.5.11.4**

स यद॒ष्टाकपालान् प्रातस्स॒वने कु॒र्यात् ।

एकादशकपाला॒न् माद्ध्यन्दि॒ने सवने ।

द्वादशकपाला॑ स्तृतीय स॒वने । विलो॒म तद्–य॒ज्ञस्य क्रियेत ।

एकादशकपाला॒नेव प्रातस्स॒वने कुर्यात् ।

एकादशकपाला॒न् माद्ध्यन्दि॒ने सवने ।

एकादशकपाला॑ स्तृतीय स॒वने । य॒ज्ञस्य सलोम॒त्वाय ॥

तदाहुः । यद् वसूनां प्रातस्स॒वनम् ( ) ।

रु॒द्रा॒णां माद्ध्यन्दिन॒॑ सवनम् । विश्वेषां दे॒वानां तृतीयस॒वनम् ।

अथ॒ कस्मा॒देतेषा॒॑ ह॒विषामिन्द्र॒मेव य॒जन्तीति ।

ए॒ता ह्येनं दे॒व॒ता इति ब्रूयात् ।

ए॒तैर्. ह॒विर्भि॒रभिषज्य॒॒॑ स्तस्मा॒दिति ॥ **57 (15)**

*(ए॒क॒वि॒॒॑श–आहु–स्तृतीयस॒वने–प्रातस्स॒वनं पञ्च च) (A11)*

## 1.5.12 अनुवाकं 12 – सप्तछन्दांसि प्रपञ्च्यन्ते (आध्वरब्राह्मणम्)

**T.B.1.5.12.1**

तस्यावाचोऽवपादादबिभयुः । तमेतेषु सप्तसु छन्दः स्वश्रयन्न् ।

यदश्रयन्न् । तच्छ्रायन्तीयस्य श्रायन्तीयत्वम् । यदवारयन्न् ।

तद् वारवन्तीयस्य वारवन्तीयत्वम् ॥ तस्यावाच एवावपादादबिभयुः ।

तस्मा एतानि सप्त चतुरुत्तराणि छन्दा॒ स्युपादधुः ।

तेषामति त्रीण्यरिच्यन्त । न त्रीण्युदभवन्न् । **58 (10)**

**T.B.1.5.12.2**

स बृहतीमेवा–स्पृशत् । द्वाभ्यामक्षराभ्याम् । अहोरात्राभ्यामेव ॥

तदाहुः । कतमा सा देवाक्षरा बृहती । यस्यां तत् प्रत्यतिष्ठत् ।

द्वादश पौर्णमास्यः । द्वादशाष्टकाः । द्वादशामावास्याः ।

एषा वाव सा देवाक्षरा बृहती । **59 (10)**

**T.B.1.5.12.3**

यस्यां तत् प्रत्यतिष्ठदिति ॥ यानि च छन्दा॒–स्यत्यरिच्यन्त ।

यानि च नोदभवन्न् । तानि निर्वीर्याणि हीनान्यमन्यन्त ।

सा ऽब्रवीद्–बृहती । मामेव भूत्वा । मामुप स॒ श्रयतेति ।

चतुर्भिरक्षरै–रनुष्टुग्–बृहतीं नोदभवत् ।

चतुर्भिरक्षरैः पङ्क्तिर्–बृहती–मत्यरिच्यत ।

तस्यामेतानि चत्वार्यक्षराण्य–पच्छिद्या–दधात् । **60 (10)**

**T.B.1.5.12.4**

ते बृहती एव भूत्वा । बृहतीमुप समश्रयताम् ॥

अष्टाभि–रक्षरैरुष्णिग्–बृहतीं नोदभवत् ।

अष्टाभिरक्षरैस्त्रिष्टुग्–बृहती–मत्यरिच्यत ।

तस्यामेता–न्यष्टावक्षराण्य–पच्छिद्यादधात् । ते बृहती एव भूत्वा ।

बृहतीमुप समश्रयताम् ।

द्वादशभि–रक्षरैर्–गायत्री–बृहतीं नोदभवत् ।

द्वादशभि–रक्षरैर्–जगती–बृहती–मत्यरिच्यत ।

तस्यामेतानि द्वादशाक्षराण्य–पच्छिद्यादधात् । **61 (10)**

**T.B.1.5.12.5**

ते बृहती एव भूत्वा । बृहतीमुप समश्रयताम् ॥

सोऽब्रवीत्–प्रजापतिः । छन्दाꣳसि रथो मे भवत ।

युष्माभि–रहमेत–मद्ध्वानमनु संचराणीति ।

तस्य गायत्री च जगती च पक्षावभवताम् ।

उष्णिक्च त्रिष्टुप्च प्रष्ट्यौ । अनुष्टुप्च पङ्क्तिश्च धुर्यौ ।
बृहत्येवोद्धिरभवत् । स एतं छन्दोरथमास्थाय ( ) ।
एतमद्ध्वानमनु समचरत् । एत९् ह वै छन्दोरथमास्थाय ।
एतमद्ध्वानमनु संचरति । येनैष एतथ् संचरति ।
य एवं ँविद्वान् थ्सोमेन यजते । य उचैनमेवं ँवेद ॥ **62 (16)**

*(अभवन् – वाव सा देवाक्षरा बृह – त्यदधाद् – द्वादशाक्षराण्यप च्छिद्यादधा – दास्थाय षट्च) (A12)*

========================

**Prapaataka Korvai with starting Words of 1 to 12 Anuvaakams :-**

(अ॒ग्नेः कृत्ति॑का॒ – यत् पुण्यं॑ – दे॒वस्य॑ सवि॒तु॒र् – ब्र॑ह्मवा॒दि॒नः क – त्यृ॒त॒मे॒व – दे॒वा वा – आयु॑षः प्रा॒ण – मिन्द्रो॑ दधी॒चो – दे॑वासु॒राः स प्र॒जाप॑ति॒ः – स स॑मु॒द्रो – ये वै च॒त्वा॒र – स्तस्यावा॑चो॒ द्वा॑दश)

**Korvai with starting Words of 1, 11, 21 Series of Dasinis :-**

(अ॒ग्नेः कृत्ति॑का – देवगृ॒हा – ऋ॒त॒मे॒व – वै॒॑श्वदे॒वे॒न – ते त॒॑दन्त॒ – तं प॑ञ्चद॒शे॒न – ते बृ॑ह॒ती ए॒व द्वि॑षष्टिः)

**First and Last Word of 5th Prapaatakam :-**

(अ॒ग्नेः कृत्ति॑का॒ – य उ॑ चैनमे॒वं॑ वेद)

॥ हरि॑ः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके पञ्चमः प्रपाठकः समाप्तः ॥

## APPENDIX FOR 1.5.1.5

**1.5.1.5 "पूर्णापश्चाद्{1}", "यत्ते देवा अदधुः{2}"**

**पूर्णा पश्चादुत** पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
तस्यान् देवा अधि सँवसन्त उत्तमे नाक इह मादयन्तां ॥

**यत्ते देवा अदधु** र्भागधेयममावास्ये सँवसन्तो महित्वा ।
सानो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं ॥

(Appearing in TS **3.5.1.1**)

# Details of Dasini & Vaakyams for Ashtakam 1 Prapaatakam 5 -TB 1.5

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 5 | 55 |
| Anuvakam 2 | 9 | 93 |
| Anuvakam 3 | 4 | 48 |
| Anuvakam 4 | 2 | 26 |
| Anuvakam 5 | 7 | 74 |
| Anuvakam 6 | 7 | 70 |
| Anuvakam 7 | 1 | 12 |
| Anuvakam 8 | 3 | 30 |
| Anuvakam 9 | 8 | 79 |
| Anuvakam 10 | 7 | 74 |
| Anuvakam 11 | 4 | 45 |
| Anuvakam 12 | 5 | 56 |
| Total → | 62 | 662 |

====================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 1.6 प्रथमाष्टके षष्ठः प्रपाठकः – राजसूयानुब्राह्मणं

### 1.6.1 अनुवाकं 1 – अनुमत्याद्या इष्टयः

**T.B.1.6.1.1**

अनुमत्यै पुरोडाश–मष्टाकपालं निर्वपति ।

ये प्रत्यञ्चः शम्याया अवशीयन्ते । तन्नैर्.ऋत–मेककपालम् ।

इयं ँवा अनुमतिः । इयं निर्.ऋतिः । नैर्.ऋतेन पूर्वेण प्रचरति ।

पाप्मानमेव निर्.ऋतिं पूर्वां निरवदयते । एक कपालो भवति ।

एकधैव निर्.ऋतिं निरवदयते । यदहुत्वा गार्.हपत्य ईयुः । **1 (10)**

**T.B.1.6.1.2**

रुद्रो भूत्वाऽग्निरनूत्थाय । अद्ध्वर्युं च यजमानं च हन्यात् ।

वीहि स्वाहा ऽऽहुतिं जुषाण इत्याह । आहुत्यैवैनꣳ शमयति ।

नार्तिमार्च्छे–त्यदद्ध्वर्युर्न यजमानः । एकोल्मुकेन यन्ति ।

तद्धि निर्.ऋत्यै भागधेयम् । इमां दिशं ँयन्ति ।

एषा वै निर्.ऋत्यै दिक् ।

स्वायामेव दिशि निर्.ऋतिं निरवदयते । **2 (10)**

**T.B.1.6.1.3**

स्वकृत इरिणे जुहोति प्रदरे वा । एतद्वै निर्.ऋत्या आयतनम् ।

स्व एवायतने निर्.ऋतिं निरवदयते । एष ते निर्.ऋते भाग इत्याह ।

निर्दिशत्येवैनाम् । भूते हविष्मत्यसीत्याह ।

भूतिमेवोपावर्तते । मुञ्चेमम९्हस इत्याह ।

अ९्हस एवैनं मुञ्चति । अङ्गुष्ठाभ्यां जुहोति । **3 (10)**

**T.B.1.6.1.4**

अन्तत एव निर्.ऋतिं निरवदयते । कृष्णं ँवासः कृष्णतूषं दक्षिणा ।

एतद्-वै निर्.ऋत्यै रूपम् । रूपेणैव निर्.ऋतिं निरवदयते ।

अप्रतीक्षमायन्ति । निर्.ऋत्या अन्तर्.हित्यै ।

स्वाहा नमो य इदं चकारेति पुनरेत्य गार्.हपत्ये जुहोति ।

आहुत्यैव नमस्यन्तो गार्.हपत्य-मुपावर्तन्ते ।

आनुमतेन प्रचरति । इयं ँवा अनुमतिः । **4 (10)**

**T.B.1.6.1.5**

इयमेवास्मै राज्यमनुमन्यते । धेनुर्-दक्षिणा । इमामेव धेनुं कुरुते ।

आदित्यं चरुं निर्वपति । उभयीष्वेव प्रजास्वभिषिच्यते ।

दैवीषु च मानुषीषु च । वरो दक्षिणा । वरो हि राज्य९् समृद्ध्यै ।

आग्नावैष्णव–मेकादशकपालं निर्वपति ।

अग्निः सर्वा देवताः । **5 (10)**

**T.B.1.6.1.6**

विष्णुर्यज्ञः । देवताश्चैव यज्ञं चाव रुन्धे । वामनो वही दक्षिणा ।

यद्–वही । तेनाग्नेयः । यद्–वामनः । तेन वैष्णवः समृद्ध्यै ।

अग्नीषोमीय–मेकादशकपालं निर्वपति ।

अग्नीषोमाभ्यां ँवा इन्द्रो वृत्रमहन्निति ।

यदग्नीषोमीय–मेकादशकपालं निर्वपति । **6 (10)**

**T.B.1.6.1.7**

वार्त्रघ्नमेव विजित्यै । हिरण्यं दक्षिणा समृद्ध्यै ।

इन्द्रो वृत्रꣳ हत्वा । देवताभिश्चेन्द्रियेण च व्यार्द्ध्यत ।

स एतमैन्द्राग्न–मेकादशकपाल–मपश्यत् । तन्निरवपत् ।

तेन वै स देवताश्चेन्द्रियं चावारुन्ध ।

यदैन्द्राग्न–मेकादशकपालं निर्वपति ।

देवताश्चैव तेनेन्द्रियं च यजमानोऽव रुन्धे ।

ऋषभो वही दक्षिणा । **7 (10)**

**T.B.1.6.1.8**

यद्-वही । तेनाग्नेयः । यदृषभः । तेनैन्द्रः समृद्ध्यै ।

आग्नेयमष्टाकपालं निर्वपति । ऐन्द्रं दधि । यदाग्नेयो भवति ।

अग्निर्वै यज्ञमुखम् । यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते ।

यदैन्द्रं दधि । **8 (10)**

**T.B.1.6.1.9**

इन्द्रियमेवाव रुन्धे । ऋषभो वही दक्षिणा । यद्वही । तेनाग्नेयः ।

यदृषभः । तेनैन्द्रः समृद्ध्यै ।

यावतीर्वै प्रजा ओषधीना-महुताना-माश्ञन्न् । ताः पराऽभवन्न् ।

आग्रयणं भवति हुताद्याय । यजमानस्यापराभावाय । **9 (10)**

**T.B.1.6.1.10**

देवा वा ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयताम् ।

तावेतमैन्द्राग्नं द्वादशकपालं निरवृणाताम् । यदैन्द्राग्नो भवत्युज्जित्यै ।

द्वादशकपालो भवति । द्वादश मासाः सम्ँवथ्सरः ।

सम्ँवथ्सरेणैवास्मा अन्नमवरुन्धे । वैश्वदेवश्चरुर् भवति ।

वैश्वदेवं ँवा अन्नम् । अन्नमेवास्मै स्वदयति । **10 (10)**

**T.B.1.6.1.11**

प्रथमजो वथ्सो दक्षिणा समृद्ध्यै । सौम्य७ं श्यामाकं चरुं निर्वपति ।

सोमो वा अकृष्टपच्यस्य राजा । अकृष्टपच्यमेवास्मै स्वदयति ।

वासो दक्षिणा । सौम्य७ंहि देवतया वासः समृद्ध्यै ।

सरस्वत्यै चरुं निर्वपति । सरस्वते चरुम् । मिथुनमेवाव रुन्धे ।

मिथुनौ गावौ दक्षिणा समृद्ध्यै ( ) । एति वा एष यज्ञमुखादृद्ध्याः ।

योऽग्नेर्देवताया एति । अष्टावेतानि हवी७ंषि भवन्ति ।

अष्टाक्षरा गायत्री । गायत्रोऽग्निः ।

तेनैव यज्ञमुखादृद्ध्या अग्नेर्देवतायै नैति ॥ **11 (16)**

*(ईयुर् - निरवदयते - ऽङ्गुष्ठाभ्यां जुहो - त्यनुमतिर् - देवता - निर्वपति - वही दक्षिणा - यदैन्द्रं द - ध्यपराभावाय - स्वदयति - गावौ दक्षिणा समृद्ध्यै षट्च) (A1)*

## 1.6.2 अनुवाकं 2– चातुर्मास्ये वैश्वदेवहवींषि

**T.B.1.6.2.1**

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । ताः सृष्टा न प्राजायन्त ।

सोऽग्निरकामयत । अहमिमाः प्रजनयेयमिति ।

स प्रजापतये शुचमदधात् । सोऽशोचत्-प्रजामिच्छमानः ।
तस्माद्यं च प्रजा भुनक्ति यं च न । तावुभौ शोचतः
प्रजामिच्छमानौ । तास्वग्निमप्य सृजत् । ता अग्निरद्ध्यैत् । **12 (10)**

**T.B.1.6.2.2**

सोमो रेतोऽदधात् । सविता प्राजनयत् । सरस्वती वाचमदधात् ।
पूषा ऽपोषयत् । ते वा एते त्रिः सम्ँवथ्सरस्य प्रयुज्यन्ते ।
ये देवाः पुष्टिपतयः । सम्ँवथ्सरो वै प्रजापतिः ।
सम्ँवथ्सरेणैवास्मै प्रजाः प्राजनयत् । ताः प्रजा जाता मरुतो घ्नन्न् ।
अस्मानपि न प्रायुक्षतेति । **13 (10)**

**T.B.1.6.2.3**

स एतं प्रजापतिर्मारुतꣳ सप्तकपाल-मपश्यत् । तं निरवपत् ।
ततो वै प्रजाभ्योकल्पत । यन्मारुतो निरुप्यते । यज्ञस्य क्लृप्त्यै ।
प्रजाना-मघाताय । सप्तकपालो भवति । सप्तगणा वै मरुतः ।
गणश एवास्मै विशं कल्पयति । स प्रजापति-रशोचत् । **14 (10)**

**T.B.1.6.2.4**

याः पूर्वाः प्रजा असृक्षि । मरुतस्ता अवधिषुः ।
कथमपराः सृजेयेति । तस्य शुष्म आण्डं भूतं निरवर्तत ।

तद्व्युदहरत् । तदपोषयत् । तत् प्राजायत ।

आण्डस्य वा एतद् रूपम् । यदामिक्षा । यद्व्युद्धरति । **15 (10)**

**T.B.1.6.2.5**

प्रजा एव तद्-यजमानः पोषयति । वैश्वदेव्यामिक्षा भवति ।

वैश्वदेव्यो वै प्रजाः । प्रजा एवास्मै प्रजनयति । वाजिनमानयति ।

प्रजास्वेव प्रजातासु रेतो दधाति । द्यावापृथिव्य एककपालो भवति ।

प्रजा एव प्रजाता द्यावापृथिवीभ्या-मुभयतः परि गृह्णाति ।

देवासुराः सम्ँयत्ता आसन्न् । सोऽग्निरब्रवीत् । **16 (10)**

**T.B.1.6.2.6**

मामग्रे यजत । मया मुखेनासुरां जेष्यथेति ।

मां द्वितीयमिति सोमोऽब्रवीत् । मया राज्ञा जेष्यथेति ।

मां तृतीयमिति सविता । मया प्रसूता जेष्यथेति ।

मां चतुर्थीमिति सरस्वती । इन्द्रियं ँवोऽहं धास्यामीति ।

मां पञ्चममिति पूषा । मया प्रतिष्ठया जेष्यथेति । **17 (10)**

**T.B.1.6.2.7**

तेऽग्निना मुखेनासुरानजयन्न् । सोमेन राज्ञा । सवित्रा प्रसूताः ।

सरस्वतीन्द्रिय–मदधात् । पूषा प्रतिष्ठा ऽऽसीत् ।

ततो वै देवा व्यजयन्त । यदेतानि हवी<sup>ं</sup>षि निरुप्यन्ते विजित्यै ।

नोत्तरवेदिमुप– वपति । पशवो वा उत्तरवेदिः ।

अजाता इव ह्येतर्.हि पशवः ( ) ॥ **18 (10)**

***(ऐद् – इत्य – शोचद् – व्युद्धर – त्यब्रवीत् – प्रतिष्ठया जेष्यथे त्येतर्.हि पशवः) (A2)***

### 1.6.3 अनुवाकं 3 – वैश्वदेवपर्गतानि विश्वेषाङ्गानि

**T.B.1.6.3.1**

त्रिवृद्–बर्.हिर्–भवति । माता पिता पुत्रः । तदेव तन् मिथुनम् ।

उल्बं गर्भो जरायु । तदेव तन् मिथुनम् ।

त्रेधा बर्.हिः संनद्धं भवति । त्रय इमे लोकाः ।

एष्वेव लोकेषु प्रति तिष्ठति ।

एकधा पुनः संनद्धं भवति ।

एक इव ह्ययं ँल्लोकः ॥ **19 (10)**

**T.B.1.6.3.2**

अस्मिन्नेव तेन लोके प्रति तिष्ठति । प्रसुवो भवन्ति ।

प्रथमजामेव पुष्टिमव रुन्धे । प्रथमजो वथ्सो दक्षिणा समृद्ध्यै ।

पृषदाज्यं गृह्णाति । पशवो वै पृषदाज्यम् । पशूनेवाव रुन्धे ।

पञ्चगृहीतं भवति । पाङ्क्ता हि पशवः । बहुरूपं भवति । **20 (10)**

**T.B.1.6.3.3**

बहुरूपा हि पशवः समृद्ध्यै । अग्निं मन्थन्ति ।

अग्निमुखा वै प्रजापतिः प्रजा असृजत । यदग्निं मन्थन्ति ।

अग्निमुखा एव तत् प्रजा यजमानः सृजते । नव प्रयाजा इज्यन्ते ।

नवानूयाजाः । अष्टौ हवी(ग्ं)षि । द्वावाघारौ । द्वावाज्यभागौ । **21 (10)**

**T.B.1.6.3.4**

त्रि(ग्ं)शथ् संपद्यन्ते । त्रि(ग्ं)शदक्षरा विराट् । अन्नं ँविराट् ।

विराजैवान्नाद्यमव रुन्धे । यजमानो वा एककपालः ।

तेज आज्यम् । यदेककपाल आज्यमानयति ।

यजमानमेव तेजसा समर्द्धयति । यजमानो वा एककपालः ।

पशव आज्यम् । **22 (10)**

**T.B.1.6.3.5**

यदेककपाल आज्यमानयति । यजमानमेव पशुभिः समर्द्धयति ।

यदल्पमानयेत् । अल्पा एनं पशवो भुञ्जन्त उपतिष्ठेरन्न् ।

यद्–बह्वानयेत् । बहव एनं पशवो भुञ्जन्त उपतिष्ठेरन्न् ।

बह्वानीयाविः पृष्ठं कुर्यात् । बहव एवैनं पशवो भुञ्जन्त उपतिष्ठन्ते ।

यजमानो वा एककपालः । यदेककपालस्यावद्येत् । **23 (10)**

**T.B.1.6.3.6**

यजमानस्यावद्येत् । उद्वा माद्येद्–यजमानः । प्र वा मीयेत ।

सकृदेव होतव्यः । सकृदिव हि सुवर्गो लोकः ।

हुत्वाऽभि जुहोति । यजमानमेव सुवर्गं ँलोकं गमयित्वा ।

तेजसा समर्द्धयति । यजमानो वा एककपालः ।

सुवर्गो लोक आहवनीयः । **24 (10)**

**T.B.1.6.3.7**

यदेककपाल–माहवनीये जुहोति ।

यजमानमेव सुवर्गं ँलोकं गमयति । यद्धस्तेन जुहुयात् ।

सुवर्गा–ल्लोकाद्–यजमान–मवविद्ध्येत् । स्रुचा जुहोति ।

सुवर्गस्य लोकस्य समष्ट्यै । यत् प्राङ्पद्येत ।

देवलोकमभि जयेत् । यद्–दक्षिणा पितृलोकम् ।

यत् प्रत्यक् । **25 (10)**

**T.B.1.6.3.8**

रक्षा॑ᳪसि यज्ञ॑ᳪ हन्युः । यदुदङ्ङ् । मनुष्यलोक–मभिजयेत् ।

प्रतिष्ठितो होतव्यः ।

एककपालं ँवै प्रतितिष्ठन्तं द्यावापृथिवी अनु प्रतितिष्ठतः ।

द्यावापृथिवी ऋतवः । ऋतून्. यज्ञः । यज्ञं ँयजमानः ।

यजमानं प्रजाः । तस्मात्–प्रतिष्ठितो होतव्यः । **26 (10)**

**T.B.1.6.3.9**

वाजिनो यजति । अग्निर्वायुः सूर्यः । ते वै वाजिनः ।

तानेव तद्–यजति । अथो खल्वाहुः । छन्दा॑ᳪसि वै वाजिन इति ।

तान्येव तद्–यजति । ऋख्सामे वा इन्द्रस्य हरी सोमपानौ ।

तयोः परिधय आधानम् । वाजिनं भागधेयम् । **27 (10)**

**T.B.1.6.3.10**

यदप्रहृत्य परिधीञ्जुहुयात् । अन्तराधानाभ्यां घासं प्रयच्छेत् ।

प्रहृत्य परिधीञ्जुहोति । निराधानाभ्यामेव घासं प्रयच्छति ।

बर्.हिषि विषिञ्चन्वाजिन–मानयति । प्रजा वै बर्.हिः ।

रेतो वाजिनम् । प्रजास्वेव रेतो दधाति । समुपहूय भक्षयन्ति ।

एतथ् सोमपीथा ह्येते ( ) । अथो आत्मन्नेव रेतो दधते ।

यजमान उत्तमो भक्षयति ।

पशवो वै वाजिनम् । यजमान एव पशून् प्रतिष्ठापयन्ति ॥ **28 (14)**

*(लोको – बहुरूपं भव – त्याज्यभागौ – पशव आज्यं – मवद्ये – दाहवनीयः – प्रत्यक् – तस्मात् प्रतिष्ठितो होतव्यो – भागधेयं – मेते चत्वारि च)* *(A3)*

### 1.6.4 अनुवाकं 4 – वरुणप्रघासाः

**T.B.1.6.4.1**

प्रजापतिः सविता भूत्वा प्रजा असृजत । ता एनमत्यमन्यन्त ।

ता अस्मादपाक्रामन्न् । ता वरुणो भूत्वा प्रजा वरुणेनाग्राहयत् ।

ताः प्रजा वरुणगृहीताः । प्रजापतिं पुनरुपाधावन्नाथ–मिच्छमानाः ।

स एतान्–प्रजापतिर्–वरुण प्रघासानपश्यत् । तान्निरवपत् ।

तैर्वै स प्रजा वरुण–पाशादमुञ्चत् ।

यद्–वरुण–प्रघासा निरुप्यन्ते । **29 (10)**

**T.B.1.6.4.2**

प्रजानामवरुणग्राहाय । तासां दक्षिणो बाहुर् न्यक्न आसीत् ।

सव्यः प्रसृतः । स एतां द्वितीयां दक्षिणतो वेदिमुदहन्न् ।

ततो वै स प्रजानां दक्षिणं बाहुं प्रासारयत् ।

यद्–द्वितीयां दक्षिणतो वेदिमुद्धन्ति ।

प्रजानामेव तद्–यजमानो दक्षिणं बाहुं प्रसारयति ।

तस्माच्चातुर्मास्ययाज्यमुष्मिन् ँल्लोक उभयाबाहुः ।

यज्ञाभिजित७ ह्यस्य । पृथमात्राद्–वेदी असंभिन्ने भवतः । **30 (10)**

**T.B.1.6.4.3**

तस्मात्–पृथमात्रं ँव्य७सौ । उत्तरस्यां ँवेद्यामुत्तरवेदिमुप वपति ।

पशवो वा उत्तरवेदिः । पशूनेवाव रुन्धे । अथो यज्ञपरुषोऽनन्तरित्यै ।

एतद्–ब्राह्मणान्येव पञ्च हवी७षि । अथैष ऐन्द्राग्नो भवति ।

प्राणापानौ वा एतौ देवानाम् । यदिन्द्राग्नी ।

यदैन्द्राग्नो भवति । **31 (10)**

**T.B.1.6.4.4**

प्राणापानावेवाव रुन्धे । ओजो बलं ँवा एतौ देवानाम् । यदिन्द्राग्नी ।

यदैन्द्राग्नो भवति । ओजो बलमेवाव रुन्धे । मारुत्यामिक्षा भवति ।

वारुण्यामिक्षा । मेषी च मेषश्च भवतः । मिथुना एव प्रजा

वरुणपाशान्–मुञ्चति । लोमशौ भवतो मेद्ध्यत्वाय । **32 (10)**

**T.B.1.6.4.5**

शमीपर्णान्युप वपति । घासमेवाभ्यामपि यच्छति ।

प्रजापतिमन्नाद्यं नोपानमत् ।

स एतेन शतेद्ध्मेन हविषा ऽन्नाद्यम–वारुन्ध ।

यत् परः शतानि शमीपर्णानि भवन्ति । अन्नाद्यस्याव–रुद्ध्यै ।

सौम्यानि वै करीराणि ।

सौम्या खलु वा आहुतिर् दिवो वृष्टिं च्यावयति ।

यत्–करीराणि भवन्ति । सौम्ययैवाहुत्या दिवो वृष्टिमव रुन्धे ( ) ।

काय एककपालो भवति । प्रजानां कंत्वाय ।

प्रतिपूरुषं करम्भ पात्राणि भवन्ति ।

जाता एव प्रजा वरुणपाशान्–मुञ्चति । एक–मतिरिक्तम् ।

जनिष्यमाणा एव प्रजा वरुणपाशान्-मुञ्चति ॥ **33 (16)**

*(निरुप्यन्ते- भवतो - भवति - मेद्ध्यत्वाय - रुन्धे षट्च) (A4)*

## 1.6.5 अनुवाकं 5 - तच्छेषः

**T.B.1.6.5.1**

उत्तरस्यां ँवेद्यामन्यानि हवीꣳषि सादयति । दक्षिणायां मारुतीम् ।

अपधुरमेवैना युनक्ति । अथो ओज एवासामवहरति ।

तस्माद्-ब्रह्मणश्च क्षत्राच्च विशोऽन्यतोऽपक्रमिणीः ।

मारुत्या पूर्वया प्रचरति । अनृतमेवाव यजते । वारुण्योत्तरया ।

अन्तत एव वरुणमव-यजते । यदेवाद्ध्वर्युः करोति । **34 (10)**

**T.B.1.6.5.2**

तत् प्रतिप्रस्थाता करोति । तस्माद्-यच्छ्रेयान्-करोति ।

तत् पापीयान्-करोति । पत्नीं ँवाचयति । मेद्ध्यामेवैनां करोति ।

अथो तप एवैनामुप नयति । यज्जारꣳ सन्तं न प्रब्रूयात् ।

प्रियं ज्ञातिꣳ रुन्ध्यात् । असौ मे जार इति निर्दिशेत् ।

निर्दिश्यैवैनं ँवरुणपाशेन ग्राहयति । **35 (10)**

**T.B.1.6.5.3**

प्रघास्यान्. हवामह इति पत्नी-मुदानयति । अह्वतैवैनाम् ।
यत्-पत्नी पुरोनुवाक्यामनु ब्रूयात् । निर्वीर्यो यजमानः स्यात् ।
यजमानो ऽन्वाह । आत्मन्नेव वीर्यं धत्ते ।
उभौ याज्या॒ँ सवीर्यत्वाय । यद्ग्रामे यदरण्य इत्याह ।
यथोदितमेव वरुणमव यजते ।
यजमानदेवत्यो वा आहवनीयः । **36 (10)**

**T.B.1.6.5.4**

भ्रातृव्य देवत्यो दक्षिणः । यदाहवनीये जुहुयात् ।
यजमानं ँवरुणपाशेन ग्राहयेत् । दक्षिणे ऽग्नौ जुहोति ।
भ्रातृव्यमेव वरुणपाशेन ग्राहयति । शूर्पेण जुहोति ।
अन्यमेव वरुणमवयजते । शीर्.षन्नधि निधाय जुहोति ।
शीर्.षत एव वरुणमव यजते । प्रत्यङ्तिष्ठञ्जुहोति । **37 (10)**

**T.B.1.6.5.5**

प्रत्यङ्ङेव वरुणपाशान्-निर्मुच्यते । अक्रन्कर्म कर्मकृत इत्याह ।
देवानृणं निरवदाय । अनृणा गृहानुप-प्रेतेति वावैतदाह ।
वरुण गृहीतं ँवा एतद्-यज्ञस्य । यद्-यजुषा गृहीतस्यातिरिच्यते ।

तुषाश्च निष्कासश्च । तुषैश्च निष्कासेन चावभृथमवैति ।

वरुण-गृहीतेनैव वरुणमवयजते । अपोऽवभृथमवैति । **38 (10)**

**T.B.1.6.5.6**

अफ्सु वै वरुणः । साक्षादेव वरुणमव यजते ।

प्रतियुतो वरुणस्य पाश इत्याह । वरुणपाशादेव निर्मुच्यते ।

अप्रतीक्ष-मायन्ति । वरुणस्यान्तर्.हित्यै । एधोऽस्येधिषीमहीत्याह ।

समिधैवाग्निं नमस्यन्त उपायन्ति । तेजोऽसि तेजो मयि धेहीत्याह ।

तेज एवात्मन्धत्ते ( ) ॥ **39 (10)**

*(करोति - ग्राहय - त्याहवनीय - स्तिष्ठञ्जुहो - त्यपोऽवभृथमवैति - धत्ते) (A5)*

**1.6.6 अनुवाकं 6 - साकमेधाः**

**T.B.1.6.6.1**

देवासुराः सम्ँयत्ता आसन्न् । सोऽग्निरब्रवीत् ।

ममेय-मनीकवती तनूः । तां प्रीणीत । अथासुरानभि भविष्यथेति ।

ते देवा अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निरवपन्न् ।

सोऽग्निरनीकवान्थ् स्वेन भागधेयेन प्रीतः ।

चतुर्द्धा ऽनीका–न्यजनयत ।

ततो देवा अभवन्न् । परा ऽसुराः । **40 (10)**

**T.B.1.6.6.2**

यदग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति ।

अग्निमेवानीकवन्तꣳ स्वेन भागधेयेन प्रीणाति ।

सोऽग्निरनीकवान्थ् स्वेन भागधेयेन प्रीतः ।

चतुर्द्धा ऽनीकानि जनयते । असौ वा आदित्योऽग्नि–रनीकवान् ।

तस्य रश्मयोऽनीकानि । साकꣳ सूर्येणोद्यता निर्वपति ।

साक्षादेवास्मा अनीकानि जनयति । तेऽसुराः पराजिता यन्तः ।

द्यावापृथिवी उपाश्रयन्न् । **41 (10)**

**T.B.1.6.6.3**

ते देवा मरुद्भ्यः सान्तपनेभ्यश्चरुं निरवपन्न् ।

तां द्यावापृथिवीभ्या–मेवोभयतः समतपन्न् ।

यन्मरुद्भ्यः सान्तपनेभ्यश्चरुं निर्वपति ।

द्यावापृथिवीभ्यामेव तदुभयतो यजमानो भ्रातृव्यान्थ् संतपति ।

मद्ध्यन्दिने निर्वपति । तर्.हि हि तेऽक्ष्णिष्ठं तपति । चरुर्भवति ।

सर्वत एवैनान्थ् संतपति । ते देवाः श्वो विजयिनः सन्तः ।

सर्वासां दुग्धे गृहमेधीयं चरुं निरवपन्न् । **42 (10)**

**T.B.1.6.6.4**

आशिता एवाद्योपवसाम । कस्य वाऽहेदम् । कस्य वा श्वो भवितेति ।

स शृतोऽभवत् । तस्याहुतस्य नाश्नन्न् । न हि देवा अहुतस्याश्नन्ति ।

तेऽब्रुवन्न् । कस्मा इमꣳ होष्याम इति ।

मरुद्भ्यो गृहमेधिभ्य इत्यब्रुवन्न् ।

तं मरुद्भ्यो गृहमेधिभ्योऽजुहवुः । **43 (10)**

**T.B.1.6.6.5**

ततो देवा अभवन्न् । पराऽसुराः । यस्यैवं ँविदुषो मरुद्भ्यो

गृहमेधिभ्यो गृहे जुह्वति । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति ।

यद्वै यज्ञस्य पाकत्रा क्रियते । पशव्यं तत् । पाकत्रा वा एतत्क्रियते ।

यन्नेद्ध्माबर्.हिर्–भवति । न सामिधेनी–रन्वाह । **44 (10)**

**T.B.1.6.6.6**

न प्रयाजा इज्यन्ते । नानूयाजाः । य एवं ँवेद । पशुमान् भवति ।

आज्यभागौ यजति । यज्ञस्यैव चक्षुषी नान्तरेति ।

मरुतो गृहमेधिनो यजति । भागधेये-नैवैनान्थ्-समर्द्धयति ।

अग्निᳶ स्विष्टकृतँ यजति प्रतिष्ठित्यै । इडान्तो भवति ( ) ।

पशवो वा इडा । पशुष्वेवोपरिष्टात् प्रति तिष्ठति ॥ **45 (12)**

***(असुरा – अश्रयन् – गृहमेधीयं चरुं निरवपन् – नजुहवु – रन्वा – हेडान्तो भवति द्वे च) (A6)***

**1.6.7 <u>अनुवाकं 7 – तच्छेषः</u>**

**<u>T.B.1.6.7.1</u>**

यत्पत्नी गृहमेधीय-स्याश्ञीयात् । गृहमेद्ध्येव स्यात् ।

वि त्वस्य यज्ञ ऋध्येत । यन्नाश्ञीयात् । अगृहमेधी स्यात् ।

नास्य यज्ञो व्यृद्ध्येत । प्रतिवेशं पचेयुः । तस्याश्ञीयात् ।

गृहमेद्ध्येव भवति । नास्य यज्ञो व्यृद्ध्यते । **46 (10)**

**<u>T.B.1.6.7.2</u>**

ते देवा गृहमेधीयेनेष्ट्वा । आशिता अभवन्न् । आञ्जताभ्यञ्जत ।

अनु वथ्सा-नवासयन्न् । तेभ्योऽसुराः क्षुधं प्राहिण्वन्न् ।

सा देवेषु लोकमवित्त्वा । असुरान्-पुनरगच्छत् । गृहमेधीयेनेष्ट्वा ।

आशिता भवन्ति । आञ्जतेऽभ्यञ्जते । **47 (10)**

**T.B.1.6.7.3**

अनु वथ्सान्. वासयन्ति ।

भ्रातृव्यायैव तद्-यजमानः क्षुधं प्रहिणोति ।

ते देवा गृहमेधीयेनेष्ट्वा । इन्द्राय निष्कासं न्यदधुः ।

अस्मानेव श्व इन्द्रो निहितभाग उपावर्तितेति ।

तानिन्द्रो निहितभाग उपावर्तत । गृहमेधीयेनेष्ट्वा ।

इन्द्राय निष्कासं निदद्ध्यात् ।

इन्द्र एवैनं निहितभाग उपावर्तते । गार्.हपत्ये जुहोति । **48 (10)**

**T.B.1.6.7.4**

भागधेयेनेवैनꣳ समर्द्धयति । ऋषभमाह्वयति ।

वषट्कार एवास्य सः ।

अथो इन्द्रियमेव तद्-वीर्यँ यजमानो भ्रातृव्यस्य वृङ्क्ते ।

इन्द्रो वृत्रꣳ हत्वा । परां परावत-मगच्छत् ।

अपाराधमिति मन्यमानः । सोऽब्रवीत् ।

क इदं वेदिष्यतीति । तेऽब्रुवन् मरुतो वरं वृणामहै । **49 (10)**

**T.B.1.6.7.5**

अथ वयं ँवेदाम । अस्मभ्यमेव प्रथम० हविर्निरुप्याता इति ।

त एनमद्ध्य–क्रीडन्न् । तत्क्रीडिनां क्रीडित्वम् ।

यन् मरुद्भ्यः क्रीडिभ्यः प्रथम० हविर्निरुप्यते विजित्यै ।

साक० सूर्येणोद्यता निर्वपति ।

एतस्मिन् वै लोक इन्द्रो वृत्रमहन्थ् समृद्ध्यै ।

एतद्–ब्राह्मणान्येव पञ्च हवी०षि । एतद्–ब्राह्मण ऐन्द्राग्नः ।

अथैष ऐन्द्रश्चरुर्–भवति ( ) । **50 (10)**

**T.B.1.6.7.6**

उद्धारं ँवा एतमिन्द्र उदहरत । वृत्र० हत्वा । अन्यासु देवतास्वधि ।

यदेष ऐन्द्र–श्चरुर् भवति । उद्धारमेव तं ँयजमान उद्धरते ।

अन्यासु प्रजास्वधि । वैश्वकर्मण एककपालो भवति ।

विश्वान्येव तेन कर्माणि यजमानो ऽवरुन्धे ॥ **51 (8)**

*(ऋद्ध्यतेऽ–भ्यञ्जते–जुहोति–वृणामहै–भवत्य– +ष्टौ च) (A7)*

## 1.6.8 अनुवाकं 8 – पितृयज्ञः

**T.B.1.6.8.1**

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत ।

ता वरुण–प्रघासैर्–वरुणपाशादमुञ्चत् । साकमेधैः प्रत्यस्थापयत् ।

त्र्यम्बकै रुद्रं निरवादयत । पितृयज्ञेन सुवर्गं ँल्लोकमगमयत् ।

यद्–वैश्वदेवेन यजते । प्रजा एव तद्–यजमानः सृजते ।

ता वरुण–प्रघासैर्–वरुणपाशान्–मुञ्चति ।

साकमेधैः प्रतिष्ठापयति । त्र्यम्बकैरुद्रं निरवदयते । **52 (10)**

**T.B.1.6.8.2**

पितृयज्ञेन सुवर्गं ँल्लोकं गमयति । दक्षिणतः प्राचीनावीती निर्वपति ।

दक्षिणावृद्धि पितृणाम् । अनादृत्य तत् । उत्तरत एवोपवीय निर्वपेत् ।

उभये हि देवाश्च पितरश्चेज्यन्ते । अथो यदेव दक्षिणार्द्धेऽधि श्रयति ।

तेन दक्षिणावृत् । सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति ।

सम्ँवथ्सरो वै सोमः पितृमान् । **53 (10)**

**T.B.1.6.8.3**

सम्ँवथ्सरमेव प्रीणाति । पितृभ्यो बर्.हिषद्भ्यो धानाः ।

मासा वै पितरो बर्.हिषदः । मासानेव प्रीणाति ।

यस्मिन् वा ऋतौ पुरुषः प्रमीयते । सोऽस्यामुष्मिन् ँल्लोके भवति ।

बहुरूपा धाना भवन्ति । अहोरात्राणा–मभिजित्यै ।

पितृभ्यो ऽग्निष्वात्तेभ्यो मन्थम् ।

अर्द्धमासा वै पितरोऽग्निष्वात्ताः । **54 (10)**

**T.B.1.6.8.4**

अर्द्धमासानेव प्रीणाति । अभिवान्यायै दुग्धे भवति ।

सा हि पितृदेवत्यं दुहे । यत् पूर्णम् । तन् मनुष्याणाम् ।

उपर्यर्द्धो देवानाम् । अर्द्धः पितृणाम् । अर्द्ध उपमन्थति ।

अर्द्धो हि पितृणाम् । एकयोपमन्थति । **55 (10)**

**T.B.1.6.8.5**

एका हि पितृणाम् । दक्षिणोपमन्थति । दक्षिणा वृद्धि पितृणाम् ।

अनारभ्योपमन्थति । तद्धि पितॄन्–गच्छति ।

इमां दिशं ँवेदिमुद्धन्ति ।

उभये हि देवाश्च पितरश्चेज्यन्ते । चतुः स्रक्तिर्भवति ।

सर्वा ह्यनु दिशः पितरः । अखाता भवति । **56 (10)**

**T.B.1.6.8.6**

खाता हि देवानाम् । मद्ध्यतो ऽग्निराधीयते ।

अन्ततो हि देवाना–माधीयते ।

वर्.षीयानिद्ध्म इद्ध्माद्–भवति व्यावृत्त्यै ।

परि श्रयति । अन्तर्.हितो हि पितृलोको मनुष्यलोकात् ।

यत्–परुषि दिनम् । तद्–देवानाम् ।

यदन्तरा । तन्–मनुष्याणाम् । **57 (10)**

**T.B.1.6.8.7**

यथ् समूलम् । तत् पितृणाम् । समूलं बर्.हिर्–भवति व्यावृत्त्यै ।

दक्षिणा स्तृणाति । दक्षिणा वृद्धि पितृणाम् । त्रिः पर्येति ।

तृतीये वा इतो लोके पितरः । तानेव प्रीणाति ।

त्रिः पुनः पर्येति । षट्थ्संपद्यन्ते । **58 (10)**

**T.B.1.6.8.8**

षड्वा ऋतवः । ऋतूनेव प्रीणाति । यत् प्रस्तरं यँजुषा गृह्णीयात् ।

प्रमायुको यजमानः स्यात् । यन्न गृह्णीयात् । अनायतनः स्यात् ।

तूष्णीमेव न्यस्येत् । न प्रमायुको भवति । नानायतनः ।
यत्–त्रीन्–परिधीन् परिदद्ध्यात् । **59 (10)**

**T.B.1.6.8.9**

मृत्युना यजमानं परि गृह्णीयात् । यन्न परि–दद्ध्यात् ।
रक्षाꣳसि यज्ञꣳ हन्युः । द्वौ परिधी परिदधाति । रक्षसा–मपहत्यै ।
अथो मृत्योरेव यजमान–मुथ्सृजति ।
यत् त्रीणि त्रीणि हवीꣴष्युदाहरेयुः । त्रयस्त्रय एषाꣳ साकं प्रमीयेरन्न् ।
एकैक–मनूचीना–न्युदाहरन्ति ।
एकैक एवैषामन्वञ्चः प्रमीयते ( ) । कशिपु कशिपव्याय ।
उपबर्.हण–मुपबर्.हण्याय । आञ्जन–माञ्जन्याय ।
अभ्यञ्जन–मभ्यञ्जन्याय । यथाभागमेवैनान् प्रीणाति ॥ **60 (15)**

*(निरवदयते – पितृमा – नग्निष्वात्ता – एकयोप मन्थ – त्यखाता भवति–मनुष्याणां – पद्यन्ते – परिदद्ध्यान् – मीयते पञ्च च) (A8)*

## 1.6.9 अनुवाकं 9 – तच्छेषः

**T.B.1.6.9.1**

अग्नये देवेभ्यः पितृभ्यः समिद्ध्यमानायानुब्रूहीत्याह ।

उभये हि देवाश्च पितरश्चेज्यन्ते । एकामन्वाह । एका हि पितृणाम् ।

त्रिरन्वाह । त्रिर्.हि देवानाम् । आघारावाघारयति ।

यज्ञ परुषोरनन्तरित्यै । नार्.षेयं वृणीते । न होतारम् । **61 (10)**

**T.B.1.6.9.2**

यदार्.षेयं वृणीत । यद्धोतारम् । प्रमायुको यजमानः स्यात् ।

प्रमायुको होता । तस्मान्न वृणीते । यजमानस्य होतुर्–गोपीथाय ।

अपबर्.हिषः प्रयाजान्.–यजति । प्रजा वै बर्.हिः ।

प्रजा एव मृत्योरुथ्सृजति । आज्यभागौ यजति । **62 (10)**

**T.B.1.6.9.3**

यज्ञस्यैव चक्षुषी नान्तरेति । प्राचीनावीती सोमं यजति ।

पितृदेवत्या हि । एषा ऽऽहुतिः । पञ्च कृत्वोऽवद्यति ।

पञ्च ह्योता देवताः । द्वे पुरोऽनुवाक्ये । याज्या देवता वषट्कारः ।

ता एव प्रीणाति । सन्ततमव द्यति । **63 (10)**

**T.B.1.6.9.4**

ऋतूना॒ँ संतत्यै । प्रैवैभ्यः पूर्वया पुरोनुवाक्यया ऽऽह ।

प्रणयति द्वितीयया । गमयति याज्यया । तृतीये वा इतो लोके पितरः ।

अह्न एवैनान् पूर्वया पुरोनुवाक्यया ऽत्यानयति । रात्रियै द्वितीयया ।

ऐवैनान्. याज्यया गमयति । दक्षिणतोऽवदाय ।

उदङ्ङ्ति क्रामति व्यावृत्त्यै । **64 (10)**

**T.B.1.6.9.5**

आ स्वधेत्या–श्रावयति । अस्तु स्वधेति प्रत्याश्रावयति ।

स्वधा नम इति वषट्करोति । स्वधाकारो हि पितृणाम् ।

सोममग्रे यजति । सोम प्रयाजा हि पितरः । सोमं पितृमन्तं ँयजति ।

सम्ँवथ्सरो वै सोमः पितृमान् । सम्ँवथ्सरमेव तद्–यजति ।

पितॄन्–बर्.हिषदो यजति । **65 (10)**

**T.B.1.6.9.6**

ये वै यज्वानः । ते पितरो बर्.हिषदः । तानेव तद्–यजति ।

पितॄनग्निष्वात्तान्. यजति । ये वा अयज्वानो गृहमेधिनः ।

ते पितरोऽग्निष्वात्ताः । तानेव तद्–यजति ।

अग्निं कव्यवाहनं ँयजति ।

य एव पितृणामग्निः । तमेव तद्–यजति । **66 (10)**

**T.B.1.6.9.7**

अथो यथाऽग्नि॰ स्विष्टकृतं ँयजति । तादृगेव तत् ।

एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति ।

तस्मादा तृतीयात् पुरुषान्नाम न गृह्णन्ति । एतावन्तो हीज्यन्ते ।

अत्र पितरो यथाभागं मन्दद्ध्वमित्याह । ह्लीका हि पितरः ।

उदञ्चो निष्क्रामन्ति । एषा वै मनुष्याणां दिक् ।

स्वामेव तद्–दिशमनु निष्क्रामन्ति । **67 (10)**

**T.B.1.6.9.8**

आहवनीय–मुपतिष्ठन्ते । न्येवास्मै तद्ध्नुवते । यथ्सत्याहवनीये ।

अथान्यत्र चरन्ति । आतमितोरुपतिष्ठन्ते । अग्निमेवोपद्रष्टारं कृत्वा ।

पितृन्–निरवदयन्ते । अन्तं ँवा एते प्राणानां गच्छन्ति ।

य आतमितोरुपतिष्ठन्ते । सुसन्दृशं त्वा वयमित्याह । **68 (10)**

**T.B.1.6.9.9**

प्राणो वै सुसन्दृक् । प्राणमेवात्मन्–दधते ।
योजा न्विन्द्र ते हरी इत्याह । प्राणमेव पुनरयुक्त ।
अक्षन्नमीमदन्त हीति गार्.हपत्य–मुपतिष्ठन्ते ।
अक्षन्नमीमदन्ताथ त्वोपतिष्ठामह इति वावैतदाह ।
अमीमदन्त पितरः सोम्या इत्यभि प्रपद्यन्ते ।
अमीमदन्त पितरोऽथ त्वाऽभि प्रपद्यामह इति वावैतदाह ।
अपः परिषिञ्चति । मार्जयत्येवैनान् । **69 (10)**

**T.B.1.6.9.10**

अथो तर्पयत्येव । तृप्यति प्रजया पशुभिः । य एवं वेद ।
अप बर्.हिषावनूयाजौ यजति । प्रजा वै बर्.हिः ।
प्रजा एव मृत्योरुथ्सृजति । चतुरः प्रयाजान्. यजति । द्वावनूयाजौ ।
षट्थ्संपद्यन्ते । षड्वा ऋतवः ( ) । **70 (10)**

**T.B.1.6.9.11**

ऋतूनेव प्रीणाति । न पत्न्यन्वास्ते । न सम्याजयन्ति ।
यत्पत्न्यन्वासीत । यथ्सम्याजयेयुः । प्रमायुका स्यात् ।
तस्मान्नान्वास्ते । न सम्याजयन्ति । पत्नियै गोपीथाय ॥ **71 (9)**

*(होतार - माज्यभागौ यजति - सन्ततमवद्यति - व्यावृत्त्यै - बर.हिषदो यजति - तमेव तद् यज- त्यनु निष्क्रामन्त्या - है - नान् - ऋतवो - +नव च) (A9)*

1.6.10 अनुवाकं 10 – त्र्यम्बकहवींषि

**T.B.1.6.10.1**

प्रतिपूरुषमेककपालान् निर्वपति । जाता एव प्रजा रुद्रान्निरवदयते ।

एकमतिरिक्तम् । जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते ।

एककपाला भवन्ति । एकधैव रुद्रं निरवदयते । नाभिघारयति ।

यदभिघारयेत् । अन्तरवचारिण९ँ रुद्रं कुर्यात् ।

एकोल्मुकेन यन्ति । **72 (10)**

**T.B.1.6.10.2**

तद्धि रुद्रस्य भागधेयम् । इमां दिशं ँयन्ति । एषा वै रुद्रस्य दिक् ।

स्वायामेव दिशि रुद्रं निरवदयते ।

रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत ।

असौ ते पशुरिति निर्दिशेद्यं द्विष्यात् । यमेव द्वेष्टि ।

तमस्मै पशुं निर्दिशति । यदि न द्विष्यात् ।

आखुस्ते पशुरिति ब्रूयात् । **73 (10)**

**T.B.1.6.10.3**

न ग्राम्यान् पशून्. हिनस्ति । नारण्यान् । चतुष्पथे जुहोति ।

एष वा अग्नीनां पड्बीशो नाम । अग्निवत्येव जुहोति ।

मद्ध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु ।

अन्तमेनैव होतव्यम् । अन्तत एव रुद्रं निरवदयते । **74 (10)**

**T.B.1.6.10.4**

एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह ।

शरद्वा अस्याम्बिका स्वसा । तया वा एष हिनस्ति । यꣳ हिनस्ति ।

तयैवैनꣳ सह शमयति । भेषजं गव इत्याह ।

यावन्त एव ग्राम्याः पशवः । तेभ्यो भेषजं करोति ।

अवाम्ब रुद्रमदिमहीत्याह । आशिषमेवैतामाशास्ते । **75 (10)**

**T.B.1.6.10.5**

त्र्यम्बकं ँयजामह इत्याह । मृत्योर् मुक्षीय मा ऽमृतादिति वावैतदाह ।

उत्किरन्ति । भगस्य लीप्सन्ते । मूते कृत्वाऽऽसजन्ति ।

यथा जनं ँयतेऽवसं करोति । तादृगेवतत् ।

एष ते रुद्र भाग इत्याह निरवत्त्यै । अप्रतीक्षमायन्ति ।

अपः परिषिञ्चति ( ) । रुद्रस्यान्तर्.हित्यै ।

प्र वा एतेऽस्मा-ल्लोकाच्च्यवन्ते । ये त्र्यम्बकैश्चरन्ति ।

आदित्यं चरुं पुनरेत्य निर्वपति । इयं ँवा अदितिः ।

अस्यामेव प्रति तिष्ठन्ति ॥ **76 (16)** ***(यन्ति - ब्रूयान् - निरवदयते - शास्ते - सिञ्चति षट्च)*** *(A10)*

==================

**Prapaataka Korvai with starting Words of 1 to 10 Anuvaakams :-**

(अनुमत्यै – वैश्वदेवेन ताः सृष्टा – स्त्रिवृत् – प्रजापतिः सवि – तोत्तरस्यां – देवासुराः सोऽग्निर् – यत् पत्नी – वैश्वदेवेन ता वरुणप्रघासै – रग्नये देवेभ्यः – प्रतिपूरुषं दश)

**Korvai with starting Words of 1, 11, 21 Series of Dasinis :-**

(अनुमत्यै – प्रथमजो वथ्सो – बहुरूपा हि पशव – स्तस्मात् पृथमात्रं – ँयदग्नयेऽनीकवत – उद्धारं ँवा – अग्नये देवेभ्य – ऋतूनेव षट्थ्सप्ततिः)

**First and Last Word of 6th Prapaatakam :-**

(अनुमत्यै – प्रति तिष्ठन्ति)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके षष्ठः प्रपाठकः समाप्तः ॥

## Details of Dasini & Vaakyams for Ashtakam1

## Prapaatakam 6 (TB 1.6)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 11 | 116 |
| Anuvakam 2 | 7 | 70 |
| Anuvakam 3 | 10 | 104 |
| Anuvakam 4 | 5 | 56 |
| Anuvakam 5 | 6 | 60 |
| Anuvakam 6 | 6 | 62 |
| Anuvakam 7 | 6 | 58 |
| Anuvakam 8 | 9 | 95 |
| Anuvakam 9 | 11 | 109 |
| Anuvakam 10 | 5 | 56 |
| Total → | 76 | 786 |

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

## 1.7 प्रथमाष्टके सप्तमः प्रपाठकः – राजसूयानुब्राह्मणं

### 1.7.1 अनुवाकं 1 – शुनासीरीयेन्द्रतुरीयपञ्चावत्तीयापामार्गहोमाः

**T.B.1.7.1.1**

ए॒तद्–ब्रा॒ह्मणान्ये॒व पञ्च ह॒वी॑ꣳषि । अथेन्द्रा॑य शु॒नासी॒राय
पु॒रोडा॒शं द्वाद॑शकपा॒लं निर्व॑पति । स॒म्व॒थ्स॒रो वा इन्द्रा॒ शुना॒सीर॑ः ।
स॒म्व॒थ्स॒रे॒णैवास्मा॒ अन्न॒मव॑ रुन्धे । वा॒य॒व्यं॑ पयो॑ भवति ।
वा॒युर्वै वृष्ट्यै॑ प्रदापयि॒ता । स ए॒वास्मै॒ वृष्टिं॒ प्रदा॑पयति ।
सौ॒र्य॑ एक॑कपालो भवति । सूर्ये॑ण॒ वा अ॒मुष्मिँ॑ल्लो॒के वृष्टि॑र्द्धृ॒ता ।
स ए॒वास्मै॒ वृष्टिं॒ नि य॑च्छति । **1 (10)**

**T.B.1.7.1.2**

द्वा॒द॒श॒ग॒वꣳ सीरं॒ दक्षि॑णा॒ सम॑द्ध्यै । दे॒वा॒सु॒राः सम्य॑त्ता आसन्न् ।
ते दे॒वा अ॒ग्निम॑ब्रुवन्न् । त्वया॑ वी॒रेणा॑सुरा॒न–भिभ॒वामे॑ति ।
सो॑ऽब्रवीत् । त्रे॒धाऽहमात्मा॒नं॒ विक॑रिष्य॒ इति । स त्रे॒धा ऽऽत्मा॒नं
व्य॑कुरुत । अ॒ग्निं॑ तृतीयम् । रु॒द्रं॑ तृतीयम् । वरु॒णं॑ तृतीयम् । **2 (10)**

**T.B.1.7.1.3**

सो॑ऽब्रवीत् । क इ॒दं तु॒रीय॒मिति॑ । अ॒हमितीन्द्रो॒॑ऽब्रवीत् ।

सं तु सृ॑जावहा॒ इति॑ । तौ सम॑सृजेताम् । स इन्द्र॑स्तु॒रीय॑-मभवत् ।

यदिन्द्र॑-स्तु॒रीय॒-मभ॑वत् । तदिन्द्र॑-तुरी॒यस्ये॒॑न्द्र-तुरी॒यत्वम् ।

तत॒ो वै दे॒वा व्य॑जयन्त । यदिन्द्र॑तुरी॒यं नि॑रु॒प्यते॒ वि॑जित्यै । **3 (10)**

**T.B.1.7.1.4**

व॒हि॑नी धे॒नु॑र्-दक्षिणा । यद्-व॒हिनी॒॑ । तेना॒॑ग्ने॒यी । यद्-गौः ।

ते॑न रौ॒द्री । यद्-धे॒नुः । ते॒नैन्द्री । यथ्स्त्री स॒ती दा॒न्ता ।

ते॑न वा॒रुणी सम॑ृद्ध्यै । प्र॒जाप॑तिर्-य॒ज्ञमसृजत । **4 (10)**

**T.B.1.7.1.5**

त॒ँ सृ॒ष्ट॒ँ रक्षा॑ँस्यजिघा॒ँसन्न् ।

स ए॒ताः प्र॒जाप॑ति-रा॒त्मनो॑ दे॒वता॒ निर॑मिमीत ।

ता॒भिर्वै स दि॒ग्भ्यो रक्षा॑ँसि॒ प्राणु॑दत ।

यत् प॑ञ्चाव॒त्तीय॑ं जु॒होति॑ ।

दि॒ग्भ्य ए॒व तद्-य॑जमा॒नो रक्षा॑ँसि॒ प्रणु॑दते ।

स॑मू॒ढ॒ँ रक्षः॒ संद॑ग्ध॒ँ रक्ष॒ इत्या॑ह । रक्षा॑ँस्ये॒व संद॑हति ।

अ॒ग्नये॑ र॒क्षो॒घ्ने स्वाहे॑त्याह ।

दे॒वता॑भ्य ए॒व वि॑जि॒ग्याना॑भ्यो भा॒ग॒धेयं॑ करोति ।

प्र॒ष्टि॒वा॒ही रथो॑ दक्षि॑णा॒ समृ॑द्ध्यै । **5 (10)**

**T.B.1.7.1.6**

इन्द्रो॑ वृ॒त्रꣳ ह॒त्वा । असु॑रान् प॒रा॒भाव्य॑ । नमु॑चिमासु॒रं नाल॑भत ।

तꣳ श॒च्या॑ऽगृह्णात् । तौ सम॑लभेताम् । सो॑ऽस्मा-द॒भिशु॑नतरो॑ऽभवत् ।

सो॑ऽब्रवीत् । सं॒धाꣳ संद॑धावहै । अथ॒ त्वा॑ऽव स्रक्ष्यामि ।

न मा॒ शुष्के॑ण॒ नार्द्रे॑ण हनः । **6 (10)**

**T.B.1.7.1.7**

न दि॒वा न न॒क्तमि॑ति । स ए॒त॒मपां फेन॑मसिञ्चत् ।

न वा ए॒ष शुष्को॒ नार्द्रो॑ व्यु॑ष्टा ऽऽसीत् । अनु॑दि॒तः सूर्यः॑ ।

न वा ए॒तद्-दि॒वा न न॑क्तम् । तस्यै॒तस्मि॑न् ँल्लो॒के ।

अ॒पां फेने॑न॒ शिर॒ उद॑वर्तयत् । तदे॒नमन्व॑वर्तत । मित्र॒द्रु॒गिति॑ । **7 (9)**

**T.B.1.7.1.8**

स ए॒ता॒नपा॑मा॒र्गानि॑जनयत् । तानजु॑होत् । तैर्वै स रक्षा॒ꣳ॒स्यपा॑हत ।

यद॑पामार्ग हो॒मो भव॑ति । रक्षसा॒-मप॑हत्यै । ए॒को॒ल् मु॒के॑न यन्ति ।

तद्धि रक्षसां भागधेयम् । इमां दिशं ँयन्ति । एषा वै रक्षसां दिक् ।

स्वायामेव दिशि रक्षाꣳसि हन्ति । **8 (10)**

**T.B.1.7.1.9**

स्वकृत इरिणे जुहोति प्रदरे वा । एतद् वै रक्षसामायतनम् ।

स्व एवायतने रक्षाꣳसि हन्ति । पर्णमयेन स्रुवेण जुहोति ।

ब्रह्म वै पर्णः । ब्रह्मणैव रक्षाꣳसि हन्ति ।

देवस्य त्वा सवितुः प्रसव इत्याह । सवितृप्रसूत एव रक्षाꣳसि हन्ति ।

हतꣳ रक्षो ऽवधिष्म रक्ष इत्याह । रक्षसाꣳ स्तृत्यै ( ) ।

यद्वस्ते तद्-दक्षिणा निरवत्त्यै । अप्रतीक्षमा यन्ति ।

रक्षसा-मन्तर्.हित्यै ॥ **9 (13)**

***(यच्छति - वरुणं तृतीयं - ँविजित्या - असृजत - समृद्ध्यै - हनो - मित्रद्रुगिति - हन्ति - स्तृत्यै त्रीणि च) (A1)***

**1.7.2 अनुवाकं 2 - देविकावहवींषि**

**T.B.1.7.2.1**

धात्रे पुरोडाशं द्वादशकपालं निर्वपति । सम्ँवथ्सरो वै धाता ।

सम्ँवथ्सरेणैवास्मै प्रजाः प्रजनयति । अन्वेवास्मा अनुमतिर्मन्यते ।

राते राका । प्र सिनीवाली जनयति ।

प्रजास्वेव प्रजातासु कुह्वा वाचं दधाति ।

मिथुनौ गावौ दक्षिणा समृद्ध्यै ।

आग्नावैष्णव-मेकादशकपालं निर्वपति ।

ऐन्द्रावैष्णव-मेकादशकपालम् । **10 (10)**

**T.B.1.7.2.2**

वैष्णवं त्रिकपालम् । वीर्यं वा अग्निः । वीर्यमिन्द्रः । वीर्यं विष्णुः ।

प्रजा एव प्रजाता वीर्ये प्रतिष्ठापयति । तस्मात् प्रजा वीर्यावतीः ।

वामन ऋषभो वही दक्षिणा । यद्वही । तेनाग्नेयः । यदृषभः । **11 (10)**

**T.B.1.7.2.3**

तेनैन्द्रः । यद्वामनः । तेन वैष्णवः समृद्ध्यै ।

अग्नीषोमीय-मेकादशकपालं निर्वपति ।

इन्द्रासोमीय-मेकादशकपालम् ।

सौम्यं चरुम् । सोमो वै रेतोधाः । अग्निः प्रजानां प्रजनयिता ।

वृद्धानामिन्द्रः प्रदापयिता । सोम एवास्मै रेतो दधाति । **12 (10)**

**T.B.1.7.2.4**

अ॒ग्निः प्र॒जां प्रज॑नयति । वृ॒द्धामिन्द्र॒ः प्रय॑च्छति ।

ब॒भ्रुर्-द॑क्षि॒णा सम॑ृद्ध्यै । सो॒मा॒पौ॒ष्णं च॒रुं निर्व॑पति ।

ऐ॒न्द्रा॒पौ॒ष्णं च॒रुम् । सोमो॒ वै रेतो॒धाः । पू॒षा प॑शू॒नां प्र॑जनयि॒ता ।

वृ॒द्धाना॒मिन्द्र॑ः प्रदापयि॒ता ।

सोम॑ ए॒वास्मै॒ रेतो॒ द॑धाति । पू॒षा प॒शून् प्र॑जनयति । **13 (10)**

**T.B.1.7.2.5**

वृ॒द्धानिन्द्र॒ः प्रय॑च्छति । पौ॒ष्ण॒श्चरुर्-भ॑वति । इ॒यं ँवै पू॒षा ।

अ॒स्यामे॒व प्रति॑ तिष्ठति । श्या॒मो द॑क्षि॒णा सम॑ृद्ध्यै ।

ब॒हु वै पु॑रुषो॒ऽमे॒द्ध्य-मु॑पगच्छति । वै॒श्वा॒न॒रं द्वाद॑शकपा॒लं निर्व॑पति ।

स॒म्॒ँव॒त्स॒रो वा अ॒ग्निर्-वै॑श्वा॒नरः । स॒म्॒ँव॒त्स॒रेणै॒वैन॑ँ स्वदयति ।

हिर॑ण्यं॒ द॑क्षिणा । **14 (10)**

**T.B.1.7.2.6**

प॒वि॒त्रं ँवै हिर॑ण्यम् । पु॒नात्ये॒वैन॑म् । ब॒हु वै रा॑ज॒न्यो ऽनृतं करोति ।

उप॑ जा॒म्यै हर॑ते । जि॒नाति॑ ब्राह्म॒णम् । व॒द॒त्यनृ॑तम् ।

अनृ॑ते॒ खलु॒ वै क्रि॒यमा॑णे॒ वरुणो गृह्णाति ।

वारुणं ँयवमयं चरुं निर्वपति ।

वरुणपाशादेवैनं मुञ्चति । अश्वो दक्षिणा ( ) ।

वारुणो हि देवतयाऽश्वः समृद्ध्यै ॥ **15 (11)**

*(ऐन्द्रावैष्णावमेकादशकपालं-ँयदृषभो- दधाति-पूषा पशून् प्रजनयति -हिरण्यं दक्षिणा-दक्षिणैकं च) (A2)*

### 1.7.3 <u>अनुवाकं 3 – रत्निनां हवींषि</u>

**<u>T.B.1.7.3.1</u>**

रत्निनामेतानि हवीꣳषि भवन्ति । एते वै राष्ट्रस्य प्रदातारः ।

एतेऽपादातारः । य एव राष्ट्रस्य प्रदातारः । येऽपादातारः ।

त एवास्मै राष्ट्रं प्रयच्छन्ति । राष्ट्रमेव भवति । यथ् समाहृत्य निर्वपेत् ।

अरत्निनः स्युः । यथायथं निर्वपति रत्नित्वाय । **16 (10)**

**<u>T.B.1.7.3.2</u>**

यथ् सद्यो निर्वपेत् । यावतीमेकेन हविषाऽऽशिषमव रुन्धे ।

तावतीमव रुन्धीत । अन्वहं निर्वपति । भूयसीमेवाशिषमव रुन्धे ।

भूयसो यज्ञक्रतूनुपैति । बार्.हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे ।

मुखत एवास्मै ब्रह्म सꣳश्यति ।

अथो ब्रह्मन्नेव क्षत्र-मन्वारम्भयति ।

शितिपृष्ठो दक्षिणा समृद्ध्यै । **17 (10)**

**T.B.1.7.3.3**

ऐन्द्र-मेकादशकपाल७ं राजन्यस्य गृहे । इन्द्रियमेवाव रुन्धे ।

ऋषभो दक्षिणा समृद्ध्यै । आदित्यं चरुं महिष्यै गृहे ।

इयं ँवा अदितिः ।

अस्यामेव प्रतितिष्ठति । धेनुर्-दक्षिणा समृद्ध्यै ।

भगाय चरुं ँवावातायै गृहे । भगमेवास्मिन् दधाति ।

विचित्तगर्भा पष्ठौही दक्षिणा समृद्ध्यै । **18 (10)**

**T.B.1.7.3.4**

नैर्.ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां ँव्रीहीणां नखनिर्भिन्नम् ।

पाप्मानमेव निर्.ऋतिं निरवदयते । कृष्णा कूटा दक्षिणा समृद्ध्यै ।

आग्नेय-मष्टाकपाल७ं सेनान्यो गृहे । सेनामेवास्य स७ंश्यति ।

हिरण्यं दक्षिणा समृद्ध्यै । वारुणं दशकपाल७ं सूतस्य गृहे ।

वरुणसवमेवाव-रुन्धे । महानिरष्टो दक्षिणा समृद्ध्यै ।

मारुत७ं सप्तकपालं ग्रामण्यो गृहे । **19 (10)**

**T.B.1.7.3.5**

अन्नं वैँ मरुतः । अन्नमेवाव–रुन्धे । पृश्ञिर्–दक्षिणा समृद्ध्यै ।

सावित्रं द्वादशकपालं क्षत्तुर्गृहे प्रसूत्यै । उपद्ध्वस्तो दक्षिणा समृद्ध्यै ।

आश्विनं द्विकपाल᳚ संग्रहीतुर्गृहे । अश्विनौ वै देवानां भिषजौ ।

ताभ्यामेवास्मै भेषजं करोति । सवात्यौ दक्षिणा समृद्ध्यै ।

पौष्णं चरुं भागदुघस्य गृहे । **20 (10)**

**T.B.1.7.3.6**

अन्नं वैँ पूषा । अन्नमेवाव रुन्धे । श्यामो दक्षिणा समृद्ध्यै ।

रौद्रं गावीधुकं चरुमक्षावापस्य गृहे । अन्तत एव रुद्रं निरवदयते ।

शबल उद्वारो दक्षिणा समृद्ध्यै । द्वादशैतानि हवी᳚षि भवन्ति ।

द्वादश मासाः सम्वँथ्सरः । सम्वँथ्सरेणैवास्मै राष्ट्रमव–रुन्धे ।

राष्ट्रमेव भवति । **21 (10)**

**T.B.1.7.3.7**

यन्न प्रति निर्वपेत् । रत्निन आशिषोऽवरुन्धीरन्न् । प्रति निर्वपति ।

इन्द्राय सुत्राम्णे पुरोडाश–मेकादशकपालम् ।

इन्द्राया᳚होमुचे । आशिष एवावरुन्धे ।

अयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वँद्ध्यादित्याह ।

आशिषमेवैतामाशास्ते । मैत्रा–बार्.हस्पत्यं भवति ।

श्वेतायै श्वेतवथ्सायै दुग्धे । **22 (10)**

**T.B.1.7.3.8**

बार्.हस्पत्ये मैत्रमपि दधाति । ब्रह्म चैवास्मै क्षत्रं च समीची दधाति ।

अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति । बार्.हस्पत्येन पूर्वेण प्रचरति ।

मुखत एवास्मै ब्रह्म स॒ऽश्यति । अथो ब्रह्मन्नेव क्षत्र–मन्वारम्भयति ।

स्वयं कृता वेदिर्भवति । स्वयंदिनं बर्.हिः । स्वयंकृत इद्ध्मः ।

अनभिजितस्या–भिजित्यै ( ) । तस्माद्–राज्ञामरण्य–मभिजितम् ।

सैव श्वेता श्वेतवथ्सा दक्षिणा समृद्ध्यै ॥ **23 (12)**

***(रत्नित्वाय – समृद्ध्यै – पष्ठौहि दक्षिणा समृद्ध्यै – ग्रामण्यो गृहे – भागदुघस्य गृहे–भवति – दुग्धे – ऽभिजित्यै द्वे च)*** *(A3)*

**1.7.4 अनुवाकं 4 – देवसुवां हवींषि**

**T.B.1.7.4.1**

देवसुवामेतानि हवी॒ꣳषि भवन्ति । एतावन्तो वै देवाना॒ꣳ सवाः ।

त एवास्मै सवान् प्रयच्छन्ति । त एन॒ꣳ सुवन्ते ।

अग्निरेवैनं गृहपतीना॒ꣳ सुवते । सोमो वनस्पतीनाम् ।

रुद्रः पशूनाम् । बृहस्पतिर्-वाचाम् ।

इन्द्रो ज्येष्ठानाम् । मित्रः सत्यानाम् । **24 (10)**

**T.B.1.7.4.2**

वरुणो धर्मपतीनाम् । एतदेव सर्वं भवति ।

सविता त्वा प्रसवानाꣳ सुवतामिति हस्तं गृह्णाति प्रसूत्यै ।

ये देवा देवसुवः स्थेत्याह । यथा यजुरेवै तत् ।

महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह ।

आशिषमेवैतामाशास्ते ।

एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्याह ।

तस्माथ्-सोमराजानो ब्राह्मणाः ।

प्रति त्यन्नाम राज्यमधायीत्याह । **25 (10)**

**T.B.1.7.4.3**

राज्यमेवास्मिन् प्रति दधाति । स्वां तनुवं वरुणो अशिश्रेदित्याह ।

वरुणसवमेवा-वरुन्धे । शुचेर्मित्रस्य व्रत्या अभूमेत्याह ।

शुचिमेवैनं व्रत्यं करोति । अमन्महि महत ऋतस्य नामेत्याह ।

मनुत एवैनम् । सर्वे व्राता वरुणस्या भूवन्नित्याह ।

सर्वव्रातमेवैनं करोति ।

वि मित्र एवैररातिमतारीदित्याह । **26 (10)**

**T.B.1.7.4.4**

अरातिमेवैनं तारयति । असूषुदन्त यज्ञिया ऋतेनेत्याह ।

स्वदयत्येवैनम् । व्यु त्रितो जरिमाणं न आनडित्याह ।

आयुरेवास्मिन् दधाति । द्वाभ्यां ँविमृष्टे । द्विपाद्–यजमानः प्रतिष्ठित्यै ।

अग्नीषोमीयस्य चैकादशकपालस्य देवसुवां च हविषामग्नये

स्विष्टकृते समवद्यति ।

देवताभिरेवैन–मुभयतः परिगृह्णाति । विष्णुक्रमान् क्रमते ( ) ।

विष्णुरेव भूत्वेमाँल्लोका–नभिजयति ॥ **27 (11)**

***(सत्याना–मधायीत्या–हातारीदित्याह–क्रमत एकं च) (A4)***

**1.7.5 अनुवाकं 5 – अभिषेकार्थमपांग्रहग्रहणम्**

**T.B.1.7.5.1**

अर्थेतः स्थेति जुहोति । आहुत्यैवैना निष्क्रीय गृह्णाति ।

अथो हविष्कृतानामेवाभिघृतानां गृह्णाति । वहन्तीनां गृह्णाति ।

एता वा अपाꣳ राष्ट्रम् । राष्ट्रमेवास्मै गृह्णाति ।

अथो श्रियमेवैनमभि वहन्ति । अपां पतिरसीत्याह ।

मिथुनमेवाकः । वृषाऽस्यूर्मिरित्याह । **28 (10)**

**T.B.1.7.5.2**

ऊर्मिमन्तमेवैनं करोति । वृषसेनोऽसीत्याह । सेनामेवास्य सᳶश्यति ।

व्रजक्षितः स्थेत्याह । एता वा अपां ँविशः । विशमेवास्मै पर्यूहति ।

मरुतामोजः स्थेत्याह । अन्नं ँवै मरुतः । अन्नमेवा वरुन्धे ।

सूर्यवर्चसः स्थेत्याह । **29 (10)**

**T.B.1.7.5.3**

राष्ट्रमेव वर्चस्व्यकः । सूर्यत्वचसः स्थेत्याह । सत्यं ँवा एतत् ।

यद्–वर्.षति । अनृतं ँयदातपति वर्.षति । सत्यानृते एवावरुन्धे ।

नैनᳶ सत्यानृते उदिते हिᳶस्तः । य एवं ँवेद ।

मान्दाः स्थेत्याह । राष्ट्रमेव ब्रह्मवर्चस्यकः । **30 (10)**

**T.B.1.7.5.4**

वाशाः स्थेत्याह । राष्ट्रमेव वश्यकः । शक्वरीः स्थेत्याह ।

पशवो वै शक्वरीः । पशूनेवाव रुन्धे । विश्वभृतः स्थेत्याह ।

राष्ट्रमेव पयस्व्यकः । जनभृतः स्थेत्याह । राष्ट्रमेवेन्द्रियाव्यकः ।

अग्नेस्तेजस्याः स्थेत्याह । **31 (10)**

**T.B.1.7.5.5**

राष्ट्रमेव तेजस्व्यकः । अपामोषधीना९ँ रसः स्थेत्याह ।
राष्ट्रमेव मधव्यमकः । सारस्वतं ग्रहं गृह्णाति ।
एषा वा अपां पृष्ठम् । यथ्सरस्वती । पृष्ठमेवैन९ँ समानानां करोति ।
षोडशभिर्-गृह्णाति । षोडशकलो वै पुरुषः । यावानेव पुरुषः ( ) ।
तस्मिन् वीर्यं दधाति ।
षोडशभिर्-जुहोति षोडशभिर्-गृह्णाति । द्वात्रि९ँशथ् संपद्यन्ते ।
द्वात्रि९ँशदक्षरा ऽनुष्टुक् । वागनुष्टुफ् सर्वाणि छन्दा९ँसि ।
वाचैवैन९ँ सर्वेभिः छन्दोभि-रभिषिञ्चति ॥ **32 (16)**

*(ऊर्मिरित्याह – सूर्यवर्चसः स्थेत्याह – ब्रह्मवर्चस्यक – स्तेजस्याः स्थेत्याहैव – पुरुषः षट्च) (A5)*

## 1.7.6 अनुवाकं 6 – अभिषेकार्थजलसंस्कारः

**T.B.1.7.6.1**

देवीरापः सं मधुमतीर्-मधुमतीभिः सृज्यद्ध्वमित्याह ।
ब्रह्मणैवैनाः स९ँ सृजति । अनाधृष्टाः सीदतेत्याह ।
ब्रह्मणैवैनाः सादयति ।

अन्तरा होतुश्च धिष्णियं ब्राह्मणाच्छ७ं सिनश्च सादयति ।

आग्नेयो वै होता । ऐन्द्रो ब्राह्मणाच्छ७ंसी ।

तेजसा चैवेन्द्रियेण चोभयतो राष्ट्रं परिगृह्णाति । हिरण्येनोत् पुनाति ।

आहुत्यै हि पवित्राभ्यामुत्पुनन्ति व्यावृत्त्यै । **33 (10)**

**T.B.1.7.6.2**

शतमानं भवति । शतायुः पुरुषः शतेन्द्रियः ।

आयुष्येवेन्द्रिये प्रतितिष्ठति । अनिभृष्टमसीत्याह । अनिभृष्ट७ ह्येतत् ।

वाचो बन्धुरित्याह । वाचो ह्येष बन्धुः । तपोजा इत्याह ।

तपोजा ह्येतत् । सोमस्य दात्रमसीत्याह । **34 (10)**

**T.B.1.7.6.3**

सोमस्य ह्येतद्दात्रम् । शुक्रा वः शुक्रेणोत्पुनामीत्याह । शुक्रा ह्यापः ।

शुक्र७ं हिरण्यम् । चन्द्राश्चन्द्रेणेत्याह । चन्द्रा ह्यापः । चन्द्र७ं हिरण्यम् ।

अमृता अमृतेनेत्याह । अमृता ह्यापः । अमृत७ं हिरण्यम् । **35 (10)**

**T.B.1.7.6.4**

स्वाहा राजसूयायेत्याह । राजसूयाय ह्येना उत्पुनाति ।

सधमादो द्युम्निनीरूर्ज एता इति वारुण्यर्चा गृह्णाति ।

वरुणसवमेवा वरुन्धे । एकया गृह्णाति । एकधैव यजमाने वीर्यं दधाति ।

क्षत्रस्योल्बमसि क्षत्रस्य योनिरसीति ताप्यं चोष्णीषं च प्रयच्छति

सयोनित्वाय ।

एकशतेन दर्भपुञ्जीलैः पवयति । शतायुर्वै पुरुषः शतवीर्यः ।

आत्मैकशतः । **36 (10)**

**T.B.1.7.6.5**

यावानेव पुरुषः । तस्मिन् वीर्यं दधाति । दद्ध्याशयति ।

इन्द्रियमेवा–वरुन्धे । उदुम्बर–माशयति । अन्नाद्यस्याव रुद्ध्यै ।

शष्पाण्याशयति । सुराबलि–मेवैनं करोति । आविद एता भवन्ति ।

आविदमेवैनं गमयन्ति । **37 (10)**

**T.B.1.7.6.6**

अग्निरेवैनं गार्.हपत्येनावति । इन्द्र इन्द्रियेण । पूषा पशुभिः ।

मित्रावरुणौ प्राणापानाभ्याम् । इन्द्रो वृत्राय वज्रमुदयच्छत् ।

स दिवमलिखत् । सोऽर्यम्णः पन्था अभवत् ।

स आविन्ने द्यावापृथिवी धृतव्रते इति द्यावापृथिवी उपाधावत् ।

स आभ्यामेव प्रसूत इन्द्रो वृत्राय वज्रं प्राहरत् ।

आविन्ने द्यावापृथिवी धृतव्रते इति यदाह । **38 (10)**

**T.B.1.7.6.7**

आभ्यामेव प्रसूतो यजमानो वज्रं भ्रातृव्याय प्रहरति ।

आविन्ना देव्यदितिर्–विश्वरूपीत्याह ।

इयं ँवै देव्यदितिर्–विश्वरूपी । अस्यामेव प्रति तिष्ठति ।

आविन्नोऽयमसावामुष्यायणोऽस्यां ँविश्यस्मिन् राष्ट्र इत्याह ।

विशैवैन७ं राष्ट्रेण समर्द्धयति ।

महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह ।

आशिषमेवैतामाशास्ते ।

एष वो भरता राजा सोमोऽस्माकं ब्राह्मणाना७ं राजेत्याह ।

तस्माथ् सोमराजानो ब्राह्मणाः । **39 (10)**

**T.B.1.7.6.8**

इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति धनुः प्रयच्छति विजित्यै ।

शत्रुबाधनाः स्थेतीषून् । शत्रूनेवास्य बाधन्ते ।

पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पातेत्याह ।

तिस्रो वै शरव्याः । प्रतीची तिरश्च्यनूची । ताभ्य एवैनं पान्ति ।

दिग्भ्यो मा पातेत्याह । दिग्भ्य एवैनं पान्ति ।

विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्याह ( ) । अपरिमितादेवैनं पान्ति ।

हिरण्यवर्णावुषसां ँविरोक इति त्रिष्टुभा बाहू उद्–गृह्णाति ।

इन्द्रियं ँवै वीर्यं त्रिष्टुक् ।

इन्द्रियमेव वीर्य–मुपरिष्टादात्मन्–धत्ते ॥ **40 (14)** ***(व्यावृत्त्यै–***

***दात्रमसीत्याहा–मृतꣳ हिरण्य–मेकशतो–गमयन्–त्याह–ब्राह्मणा–***

***नाष्ट्राभ्यः पातेत्याह चत्वारि च) (A6)***

### 1.7.7 <u>अनुवाकं 7 – दिग्व्यास्थापनम्</u>

**<u>T.B.1.7.7.1</u>**

दिशो व्यास्थापयति । दिशामभिजित्यै । यदनु प्रक्रामेत् ।

अभि दिशो जयेत् । उत्तु माद्येत् । मनसाऽनु प्रक्रामति ।

अभि दिशो जयति । नोन्माद्यति । समिधमा तिष्ठेत्याह ।

तेज एवावरुन्धे । **41 (10)**

**<u>T.B.1.7.7.2</u>**

उग्रामा तिष्ठेत्याह । इन्द्रियमेवाव रुन्धे । विराजमा तिष्ठेत्याह ।

अन्नाद्यमेवाव रुन्धे । उदीचीमा तिष्ठेत्याह । पशूनेवाव रुन्धे ।

ऊर्द्ध्वामा तिष्ठेत्याह । सुवर्गमेव लोक-मभिजयति ।

अनूज्जिहीते । सुवर्गस्य लोकस्य समष्ट्यै । **42 (10)**

**T.B.1.7.7.3**

मारुत एष भवति । अन्नं वै मरुतः । अन्नमेवाव रुन्धे ।

एकवि॒ꣳशतिकपालो भवति प्रतिष्ठित्यै । योऽरण्ये ऽनुवाक्यो गणः ।

तं मद्ध्यत उपदधाति । ग्राम्यैरेव पशुभि-रारण्यान् पशून् परिगृह्णाति ।

तस्माद्-ग्राम्यैः पशुभिरारण्याः पशवः परिगृहीताः । पृथिर्वैन्यः ।

अभ्यषिच्यत । **43 (10)**

**T.B.1.7.7.4**

स राष्ट्रं नाभवत् । स एतानि पार्थान्यपश्यत् । तान्यजुहोत् ।

तैर्वै स राष्ट्र-मभवत् । यत्पार्थानि जुहोति । राष्ट्रमेव भवति ।

बार्.हस्पत्यं पूर्वेषामुत्तमं भवति । ऐन्द्रमुत्तरेषां प्रथमम् ।

ब्रह्म चैवास्मै क्षत्रं च समीची दधाति ।

अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति । **44 (10)**

**T.B.1.7.7.5**

षट्पुरस्ता-दभिषेकस्य जुहोति । षडुपरिष्टात् । द्वादश सं पद्यन्ते ।

द्वादश मासाः सम्ँवथ्सरः । सम्ँवथ्सरः खलु वै देवानां पूः ।

देवानामेव पुरं मद्ध्यतो व्यवसर्पति ।

तस्य न कुतश्च नोपाव्याधो भवति । भूताना-मवेष्टीर्-जुहोति ।

अत्रात्र वै मृत्युर्-जायते । यत्र यत्रैव मृत्युर्-जायते ( ) ।

तत एवैनमवयजते । तस्माद्-राजसूयेनेजानः सर्वमायुरेति ।

सर्वे ह्यस्य मृत्यवोऽवेष्टाः । तस्माद्-राजसूयेनेजानो नाभिचरितवै ।

प्रत्यगेन-मभिचारः स्तृणुते ॥ **45 (15)**

***(रुन्धे-समष्ट्या-असिच्यत-स्थापयति-जायते पञ्च च) (A7)***

**1.7.8 अनुवाकं 8 - अभिषेकः**

**T.B.1.7.8.1**

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलचर्मोपस्तृणाति ।

यैव सोमे त्विषिः । या शार्दूले । तामेवाव रुन्धे ।

मृत्योर्वा एष वर्णः । यच्छार्दूलः । अमृतꣳ हिरण्यम् ।

अमृतमसि मृत्योर्मा पाहीति हिरण्य-मुपास्यति ।

अमृतमेव मृत्योरन्तर्-द्धत्ते । शतमानं भवति । **46 (10)**

**T.B.1.7.8.2**

शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रति तिष्ठति ।

दिद्योन्मा पाहीत्युपरिष्टादधि निदधाति । उभयत एवास्मै शर्म दधाति ।

अवेष्टा दन्दशूका इति क्लीबꣳ सीसेन विद्ध्यति ।

दन्दशूका–नेवाव यजते । तस्मात् क्लीबं दन्दशूका दꣳशुकाः ।

निरस्तं नमुचेः शिर इति लोहितायसं निरस्यति ।

पाप्मानमेव नमुचिं निरवदयते ।

प्राणा आत्मनः पूर्वेऽभिषिच्या इत्याहुः । **47 (10)**

**T.B.1.7.8.3**

सोमो राजा वरुणः । देवा धर्मसुवश्च ये ।

ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तामित्याह ।

प्राणानेवात्मनः पूर्वा–नभिषिञ्चति । यद्–ब्रूयात् ।

अग्नेस्त्वा तेजसा ऽभिषिञ्चामीति । तेजस्व्येव स्यात् ।

दुश्चर्मा तु भवेत् । सोमस्य त्वा द्युम्नेना–भिषिञ्चामीत्याह ।

सौम्यो वै देवतया पुरुषः । **48 (10)**

**T.B.1.7.8.4**

स्वयैवैनं देवतयाऽभिषिञ्चति । अग्ने-स्तेजसेत्याह ।

तेज एवास्मिन् दधाति । सूर्यस्य वर्चसेत्याह । वर्च एवास्मिन् दधाति ।

इन्द्रस्ये-न्द्रियेणेत्याह । इन्द्रियमेवास्मिन् दधाति ।

मित्रावरुणयोर्-वीर्येणेत्याह । वीर्यमेवास्मिन् दधाति ।

मरुतामोजसेत्याह । **49 (10)**

**T.B.1.7.8.5**

ओज एवास्मिन् दधाति । क्षत्त्राणां क्षत्त्रपतिरसीत्याह ।

क्षत्त्राणामेवैनं क्षत्त्रपतिं करोति । अति दिवस्पाहीत्याह ।

अत्यन्यान् पाहीति वावैतदाह । समाववृत्रन्न-धरागुदीची-रित्याह ।

राष्ट्रमेवास्मिन् ध्रुवमकः । उच्छेषणेन जुहोति ।

उच्छेषणभागो वै रुद्रः । भागधेयेनैव रुद्रं निरवदयते । **50 (10)**

**T.B.1.7.8.6**

उदङ्परेत्याग्नीद्ध्रे जुहोति । एषा वै रुद्रस्य दिक् ।

स्वायामेव दिशि रुद्रं निरवदयते । रुद्र यत्ते क्रयी परं नामेत्याह ।

यद्वा अस्य क्रयी परं नाम । तेन वा एष हिनस्ति । यं॒ हिनस्ति ।

तेनैवैन॒ꣳ स॒ह शमयति । तस्मै॑ हु॒तमसि य॒मेष्ट॒मसीत्याह ।

य॒मा॒देवास्य मृ॒त्युमवयजते । **51 (10)**

**T.B.1.7.8.7**

प्रजापत॒ न त्वद॒ेतान्य॒न्य इ॒ति तस्यै॑ गृ॒हे जुहुयात् ।

यां का॒मयेत रा॒ष्ट्रमस्यै प्र॒जा स्या॒दिति । रा॒ष्ट्र॒मेवास्यै प्र॒जा भवति ।

प॒र्ण॒–मयेना–द्ध्व॒र्यु–र॒भिषिञ्चति । ब्र॒ह्म॒व॒र्च॒सम॒ेवास्मि॒न्–त्विषिं दधाति ।

औदुम्बरेण राज॒न्यः । ऊर्जम॒ेवास्मि–न्न॒न्नाद्यं दधाति । आश्वत्थे॒न वैश्यः ।

विशम॒ेवास्मि॒न् पुष्टिं दधाति । नैयग्रोधे॒न जन्यः( ) ।

मि॒त्राण्य॒ेवास्मै कल्पयति । अथो॒ प्रतिष्ठित्यै ॥ **52 (12)**

***(भ॒व॒ – त्या॒हु॒ः – पुरु॒ष – ओज॒सेत्याह – नि॒रवदयते – यज॒ते – जन्यो॒ द्वे च) (A8)***

### 1.7.9 अनुवाकं 9 – स्थारोहणम्. विजयः

**T.B.1.7.9.1**

इन्द्रस्य॒ वज्रोऽसि॒ वार्त्रघ्न॒ इति॒ रथमु॒पावहरति॒ विजित्यै ।

मि॒त्रावरुणयोस्त्वा प्रशास्त्रो॒ः प्र॒शिषा युन॒ज्मीत्याह ।

ब्रह्म॒णैवैनं दे॒वताभ्यां युनक्ति । प्र॒ष्टि॒वा॒हिनं युनक्ति ।

प्रष्टिवाही वै देवरथः । देवरथ-मेवास्मै युनक्ति । त्रयोऽश्वा भवन्ति ।

रथश्चतुर्थः । द्वौ सव्येष्ठसारथी । षट्थ् संपद्यन्ते । **53 (10)**

**T.B.1.7.9.2**

षड्वा ऋतवः । ऋतुभिरेवैनं ँयुनक्ति । विष्णुक्रमान्-क्रमते ।

विष्णुरेव भूत्वेमान् ँलोकानभिजयति । यः क्षत्रियः प्रतिहितः ।

सोऽन्वारभते । राष्ट्रमेव भवति । त्रिष्टुभा ऽन्वारभते ।

इन्द्रियं ँवै त्रिष्टुक् । इन्द्रियमेव यजमाने दधाति । **54 (10)**

**T.B.1.7.9.3**

मरुतां प्रसवे जेषमित्याह । मरुद्भिरेव प्रसूत उज्जयति ।

आप्तं मन इत्याह । यदेव मनसैफ्सीत् । तदापत् । राजन्यं जिनाति ।

अनाक्रान्त एवाक्रमते । वि वा एष इन्द्रियेण वीर्येणर्द्ध्यते ।

यो राजन्यं जिनाति । समहमिन्द्रियेण वीर्येणेत्याह । **55 (10)**

**T.B.1.7.9.4**

इन्द्रियमेव वीर्यमात्मन्-धत्ते । पशूनां मन्युरसि तवेव मे

मन्युर्भूयादिति वाराही उपानहावुप मुञ्चते । पशूनां ँवा एष मन्युः ।

यद् वराहः । तेनैव पशूनां मन्युमात्मन् धत्ते ।

अभि वा इय॑ सुषुवाणं कामयते । तस्येश्वरेन्द्रियं वीर्यमादातोः ।
वाराही उपानहावुपमुञ्चते । अस्या एवान्तर्दधत्ते ।
इन्द्रियस्य वीर्यस्यानात्त्यै । **56 (10)**

**T.B.1.7.9.5**

नमो मात्रे पृथिव्या इत्याहाहि॑ सायै ।
इयदस्या–युरस्यायुर्मे धेहीत्याह । आयुरेवात्मन्–धत्ते ।
ऊर्गस्यूर्जं मे धेहीत्याह । ऊर्जमेवात्मन् धत्ते ।
युङ्ङसि वर्चोऽसि वर्चो मयि धेहीत्याह । वर्च एवात्मन् धत्ते ।
एकधा ब्रह्मण उप हरति । एकधैव यजमान आयुरूर्जं वर्चो दधाति ।
रथविमोचनीया जुहोति प्रतिष्ठित्यै । **57 (10)**

**T.B.1.7.9.6**

त्रयोऽश्वा भवन्ति । रथश्चतुर्थः । तस्मा–च्चतुर्जुहोति ।
यदुभौ सहावतिष्ठेताम् । समानं लोकमियाताम् ।
सह संग्रहीत्रा रथवाहने रथमादधाति । सुवर्गादेवैनं लोकादन्तर्दधाति ।
ह॑सः शुचिषदित्या दधाति । ब्रह्मणैवैन–मुपावहरति ।
ब्रह्मणा ऽऽदधाति ( ) ।

अतिच्छन्दसा ऽऽदधाति । अतिच्छन्दा वै सर्वाणि छन्दाꣳसि ।

सर्वेभिरेवैनं छन्दोभि–रादधाति । वर्ष्म वा एषा छन्दसाम् ।

यदतिच्छन्दाः । यदतिच्छन्दसा दधाति ।

वर्ष्मैवैनꣳ समानानां करोति ॥ **58 (17)**

(*पद्यन्ते – दधाति – वीर्येणेत्याहा – नात्यै – प्रतिष्ठित्यै – ब्रह्मणाऽऽदधाति सप्त च) (A9)*

## 1.7.10 अनुवाकं 10 – आसने समुपवेशः सर्वैस्सेव्यत्वं च

**T.B.1.7.10.1**

मित्रोऽसि वरुणोऽसीत्याह । मैत्रं वा अहः । वारुणी रात्रिः ।

अहोरात्राभ्या–मेवैन–मुपावहरति । मित्रोऽसि वरुणोसीत्याह ।

मैत्रो वै दक्षिणः । वारुणः सव्यः । वैश्वदेव्यामिक्षा ।

स्वमेवैनौ भागधेय–मुपावहरति । समहं विश्वैर्देवै–रित्याह । **59 (10)**

**T.B.1.7.10.2**

वैश्वदेव्यो वै प्रजाः । ता एवाद्याः कुरुते ।

क्षत्रस्य नाभिरसि क्षत्रस्य योनि–रसीत्यधीवासमा–स्तृणाति

सयोनित्वाय ।

स्योनामासीद सुषदामासीदेत्याह । यथा यजुरेवै तत् ।

मा त्वा हिꣳसीन् मा मा हिꣳसीदित्याहा-हिꣳसायै ।

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरित्याह ।

साम्राज्यमेवैनꣳ सुक्रतुं करोति ।

ब्रह्मा(3)न्त्वꣳ राजन्-ब्रह्माऽसि सविताऽसि सत्यसव इत्याह ।

सवितार-मेवैनꣳ सत्यसवं करोति । **60 (10)**

**<u>T.B.1.7.10.3</u>**

ब्रह्मा(3)न्त्वꣳ राजन्-ब्रह्माऽसीन्द्रोऽसि सत्यौजा इत्याह ।

इन्द्रमेवैनꣳ सत्यौजसं करोति ।

ब्रह्मा(3)न्त्वꣳ राजन्-ब्रह्माऽसि मित्रोऽसि सुशेव इत्याह ।

मित्रमेवैनꣳ सुशेवं करोति ।

ब्रह्मा(3)न्त्वꣳ राजन्-ब्रह्माऽसि वरुणोऽसि सत्यधर्मेत्याह ।

वरुणमेवैनꣳ सत्यधर्माणं करोति । सविताऽसि सत्यसव इत्याह ।

गायत्री-मेवैतेनाभिव्याहरति । इन्द्रोऽसि सत्यौजा इत्याह ।

त्रिष्टुभ-मेवैतेनाभि-व्याहरति । **61 (10)**

**T.B.1.7.10.4**

मित्रोऽसि सुशेव इत्याह । जगती–मेवैतेनाभिव्याहरति ।

सत्यमेता देवताः । सत्यमेतानि छन्दाꣳसि । सत्यमेवाव रुन्धे ।

वरुणोऽसि सत्यधर्मेत्याह । अनुष्टुभ–मेवैतेनाभिव्याहरति ।

सत्यानृते वा अनुष्टुप् । सत्यानृते वरुणः ।

सत्यानृते एवावरुन्धे । **62 (10)**

**T.B.1.7.10.5**

नैनꣳ सत्यानृते उदिते हिꣳस्तः । य एवं वेद ।

इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति स्फ्यं प्रयच्छति । वज्रो वै स्फ्यः ।

वज्रेणैवास्मा अवरपरꣳ रन्धयति । एवꣳ हि तच्छ्रेयः ।

यदस्मा एते रद्ध्येयुः ।

दिशोऽभ्ययꣳ राजा ऽभूदिति पञ्चाक्षान्–प्रयच्छति ।

एते वै सर्वेऽयाः । अपराजायिन–मेवैनं करोति । **63 (10)**

**T.B.1.7.10.6**

ओदनमुद्ब्रुवते । परमेष्ठी वा एषः ।

यदोदनः । परमामेवैनꣳ श्रियं गमयति ।

सुश्लोकाँ(4) सुमङ्गलाँ(4) सत्यराजा(3)नित्याह ।

आशिषमेवैतामा शास्ते । शौनः शेपमाख्यापयते ।

वरुणपाशा-देवैनं मुञ्चति । परः शतं भवति ।

शतायुः पुरुषः शतेन्द्रियः( ) । आयुष्येवेन्द्रिये प्रतितिष्ठति ।

मारुतस्य चैकविꣳशतिकपालस्य वैश्वदेव्यै चामिक्षाया अग्नये

स्विष्टकृते समवद्यति ।

देवताभिरेवैन-मुभयतः परिगृह्णाति ।

अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहेति तिस्र

आहुतीर् जुहोति ।

त्रय इमे लोकाः । एष्वेव लोकेषु प्रति तिष्ठति ॥ **64 (16)**

*(देवैरित्याह - सत्यसवं करोति - त्रिष्टुभमेवैतेनाभि व्याहरति-*
*सत्यानृते एवावरुन्धे - करोति - शतेन्द्रियः षट्च) (A10)*

==================

**Prapaataka Korvai with starting Words of 1 to 10 Anuvaakams :-**

(एतद् ब्राह्मणानि – धात्रे – रत्निनां – देवसुवा – मर्थेतो – देवीर् – दिशः – सोमस्ये – न्द्रस्य – मित्रो दश)

**Korvai with starting Words of 1, 11, 21 Series of Dasinis :-**

(एतद् ब्राह्मणानि – वैष्णवं त्रिकपाल – मन्नं वै पूषा – वाशाः स्थेत्याह – दिशो व्यास्थापय – त्युदङ्परेत्य – ब्रह्मा(3)न्त्वं राजं चतुष्षष्टिः

**First and Last Word of 7th Prapaatakam :-**

(एतद् ब्राह्मणानि – प्रति तिष्ठति)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके

सप्तमः प्रपाठकः समाप्तः ॥

======================

## 1.7Details of Dasini & Vaakyams for Ashtakam 1 Prapaatakam 7, (TB 1.7)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 9 | 93 |
| Anuvakam 2 | 6 | 61 |
| Anuvakam 3 | 8 | 82 |
| Anuvakam 4 | 4 | 41 |
| Anuvakam 5 | 5 | 56 |
| Anuvakam 6 | 8 | 84 |
| Anuvakam 7 | 5 | 55 |
| Anuvakam 8 | 7 | 72 |
| Anuvakam 9 | 6 | 67 |
| Anuvakam 10 | 6 | 66 |
| Total → | 64 | 677 |

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## 1.8 प्रथमाष्टके अष्टमः प्रपाठकः – राजसूयानुब्राह्मणं

### 1.8.1 अनुवाकं 1 – संसृपां हवींषि दश

**T.B.1.8.1.1**

वरुणस्य सुषुवाणस्य दशधेन्द्रियं ँवीर्यं पराऽपतत् ।

तथ्सꣳ सृद्भिरनु समसर्पत् । तथ्सꣳ सृपाꣳ सꣳ सृत्त्वम् ।

अग्निना देवेन प्रथमे ऽहन्ननु प्रायुङ्क्त । सरस्वत्या वाचा द्वितीये ।

सवित्रा प्रसवेन तृतीये । पूष्णा पशुभिश्चतुर्थे ।

बृहस्पतिना ब्रह्मणा पञ्चमे । इन्द्रेण देवेन षष्ठे ।

वरुणेन स्वया देवतया सप्तमे । **1 (10)**

**T.B.1.8.1.2**

सोमेन राज्ञाऽष्टमे । त्वष्ट्रा रूपेण नवमे । विष्णुना यज्ञेनाप्नोत् ।

यथ्सꣳ सृपो भवन्ति । इन्द्रियमेव तद्–वीर्यं ँयजमान आप्नोति ।

पूर्वा पूर्वा वेदिर्भवति । इन्द्रियस्य वीर्यस्यावरुद्ध्यै ।

पुरस्ता–दुपसदाꣳ सौम्येन प्रचरति । सोमो वै रेतोधाः ।

रेत एव तद्–दधाति ( ) । अन्तरा त्वाष्ट्रेण ।

रेत एव हितं त्वष्टा रूपाणि विकरोति । उपरिष्टाद्-वैष्णवेन ।

यज्ञो वै विष्णुः । यज्ञ एवान्ततः प्रति तिष्ठति ॥ **2 (15)**

*(सप्तमे - दधाति पञ्च च) (A1)*

**1.8.2 अनुवाकं 2 - दशपेयः**

**T.B.1.8.2.1**

जामि वा एतत् कुर्वन्ति । यथ्सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति ।

पुण्डरिस्रजां प्रयच्छत्यजामित्वाय । अङ्गिरसः सुवर्गं ँलोकं ँयन्तः ।

अफ्सु दीक्षातपसी प्रावेशयन्न् । तत् पुण्डरीक-मभवत् ।

यत् पुण्डरिस्रजां प्रयच्छति । साक्षादेव दीक्षातपसी अवरुन्धे ।

दशभिर्वथ्सतरैः सोमं क्रीणाति । दशाक्षरा विराट् । **3 (10)**

**T.B.1.8.2.2**

अन्नं ँविराट् । विराजैवान्नाद्यमव रुन्धे । मुष्करा भवन्ति सेन्द्रत्वाय ।

दशपेयो भवति । अन्नाद्यस्यावरुद्ध्यै । शतं ब्राह्मणाः पिबन्ति ।

शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रति तिष्ठति ।

सप्तदश७ स्तोत्रं भवति । सप्तदशः प्रजापतिः । **4 (10)**

**T.B.1.8.2.3**

प्रजापतेराप्त्यै । प्राकाशावद्ध्वर्यवे ददाति । प्रकाश-मेवैनं गमयति ।

स्रजमुद्-गात्रे । व्येवास्मै वासयति । रुक्मꣳ होत्रे ।

आदित्यमेवास्मा उन्नयति । अश्वं प्रस्तोतृप्रतिहर्तृभ्याम् ।

प्राजापत्यो वा अश्वः । प्रजापतेराप्त्यै । **5 (10)**

**T.B.1.8.2.4**

द्वादश-पष्ठौहीर्-ब्रह्मणे । आयुरेवाव-रुन्धे । वशां मैत्रावरुणाय ।

राष्ट्रमेव वश्यकः । ऋषभं ब्राह्मणाच्छꣳसिने । राष्ट्र-मेवेन्द्रियाव्यकः ।

वाससी नेष्टापोतृभ्यां । पवित्रे एवास्यैते ।

स्थूरि यवाचित-मच्छावाकाय । अन्तत एव वरुणमव यजते । **6 (10)**

**T.B.1.8.2.5**

अनड्वाह-मग्नीधे । वह्निर्वा अनड्वान् । वह्निरग्नीत् ।

वह्निनैव वह्नि यज्ञस्यावरुन्धे ।

इन्द्रस्य सुषुवाणस्य त्रेधेन्द्रियं वीर्यं पराऽपतत् ।

भृगु-स्तृतीय-मभवत् । श्रायन्तीयं तृतीयम् । सरस्वती तृतीयम् ।

भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति ( ) ।

वारवन्तीय–मग्निष्टोम–सामम् । सारस्वतीरपो गृह्णाति ।
इन्द्रियस्य वीर्यस्याव–रुद्ध्यै । श्रायन्तीयं ब्रह्मसामं भवति ।
इन्द्रियमेवास्मिन् वीर्यꣳ श्रयति । वारवन्तीय–मग्निष्टोम–सामम् ।
इन्द्रियमेवास्मिन् वीर्यं ँवारयति ॥ **7 (17)** ***(विराट् – प्रजापति – रश्वः प्रजापतेराप्त्यै – यजते – ब्रह्मसामं भवति सप्त च) (A2)***

**1.8.3 <u>अनुवाकं 3 – दिशामवेष्टयः, पशुबन्धः, सात्यदूतहवींषि च</u>**

**<u>T.B.1.8.3.1</u>**

ईश्वरो वा एष दिशोऽनून्–मदितोः । यं दिशोऽनु व्यास्थापयन्ति ।
दिशामवेष्टयो भवन्ति । दिक्ष्वेव प्रति तिष्ठत्यनुन्मादाय ।
पञ्च देवता यजति । पञ्च दिशः । दिक्ष्वेव प्रति तिष्ठति ।
हविषो हविष इष्ट्वा बार्.हस्पत्य–मभिघारयति ।
यजमानदेवत्यो वै बृहस्पतिः ।
यजमानमेव तेजसा समर्द्धयति । **8 (10)**

**<u>T.B.1.8.3.2</u>**

आदित्यां मल्.हां गर्भिणीमा लभते । मारुतीं पृश्ञिं पष्ठौहीम् ।
विशं चैवास्मै राष्ट्रं च समीची दधाति । आदित्यया पूर्वया प्रचरति ।

मारुत्योत्तरया । राष्ट्र एव विशमनुबद्ध्नाति ।

उच्चैरादित्याया आश्रावयति । उपा८्शु मारुत्यै ।

तस्माद्-राष्ट्रं ँविशमतिवदति । गर्भिण्यादित्या भवति । **9 (10)**

**T.B.1.8.3.3**

इन्द्रियं ँवै गर्भः । राष्ट्र-मेवेन्द्रियाव्यकः । अगर्भा मारुती ।

विड्वै मरुतः । विशमेव निरिन्द्रियामकः । देवासुराः सम्ँयत्ता आसन्न् ।

ते देवा अश्विनोः पूषन्-वाचः सत्य८् संनिधाय ।

अनृतेनासुरा-नभ्यभवन्न् ।

तेऽश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निरवपन्न् ।

ततो वै ते वाचः सत्यमवारुन्धत । **10 (10)**

**T.B.1.8.3.4**

यदश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति ।

अनृतेनैव भ्रातृव्या-नभिभूय । वाचः सत्यमवरुन्धे ।

सरस्वते सत्यवाचे चरुम् । पूर्वमेवोदितम् । उत्तरेणाभि गृणाति ।

सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं प्रसूत्यै ।

दूतान्-प्रहिणोति ।

आविद एता भवन्ति । आविदमेवैनं गमयन्ति ( ) ।

अथो दूतेभ्य एव न छिद्यते ।

तिसृधन्वꣳ शुष्कदृतिर्-दक्षिणा समृद्ध्यै ॥ **11 (12)**

*(अर्द्धयति - भव - त्यरुन्धत - गमयन्ति द्वे च) (A3)*

### 1.8.4 अनुवाकं 4 - प्रयुजां हवींषि द्वादश

**T.B.1.8.4.1**

आग्नेय-मष्टाकपालं निर्वपति । तस्मा-च्छिशिरे कुरुपञ्चालाः

प्राञ्चो यान्ति । सौम्यं चरुम् । तस्माद्-वसन्तं ँव्यवसायादयन्ति ।

सावित्रं द्वादशकपालम् । तस्मात्-पुरस्ताद्-यवानाꣳ सवित्रा विरुन्धते ।

बार्.हस्पत्यं चरुम् । सवित्रैव विरुद्ध्य । ब्रह्मणा यवानादधते ।

त्वाष्ट्र-मष्टाकपालम् । **12 (10)**

**T.B.1.8.4.2**

रूपाण्येव तेन कुर्वते । वैश्वानरं द्वादशकपालम् ।

तस्माज्जघन्ये नैदाघे प्रत्यञ्चः कुरुपञ्चाला यान्ति ।

सारस्वतं चरुं निर्वपति । तस्मात्-प्रावृषि सर्वा वाचो वदन्ति ।

पौष्णेन व्यवस्यन्ति । मैत्रेण कृषन्ते ।

वारुणेन विधृता आसते ।

क्षैत्रपत्येन पाचयन्ते । आदित्येनादधते । **13 (10)**

**T.B.1.8.4.3**

मासिमास्येतानि हवीꣳषि निरुप्याणीत्याहुः । तेनैवर्तून्-प्रयुङ्क्त इति ।

अथो खल्वाहुः । कः सम्ँवथ्सरं जीविष्यतीति ।

षडेव पूर्वेद्युर्निरुप्याणि । षडुत्तरेद्युः । तेनैवर्तून्-प्रयुङ्क्ते ।

दक्षिणो रथवाहनवाहः पूर्वेषां दक्षिणा । उत्तर उत्तरेषाम् ।

सम्ँवथ्सरस्यैवान्तौ युनक्ति ( ) ।

सुवर्गस्य लोकस्य समष्ट्यै ॥ **14 (11)**

*(त्वाष्ट्रमष्टाकपालं - दधते - युनक्त्येकं च) (A4)*

**1.8.5 अनुवाकं 5 - सौत्रामणिः, पशवः, हवींषि च**

**T.B.1.8.5.1**

इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं ँवीर्यं पराऽपतत् ।

स यत् प्रथमं निरष्ठीवत् । तत्-क्वलमभवत् । यद्-द्वितीयम् ।

तद्-बदरम् । यत्-तृतीयम् । तत्-कर्कन्धु । यन्नस्तः ।

स सिꣳहः । यदक्ष्योः । **15 (10)**

**T.B.1.8.5.2**

स शार्दूलः । यत्-कर्णयोः । स वृकः । य ऊर्द्ध्वः । स सोमः ।

या ऽवाची । सा सुरा । त्रयाः सक्तवो भवन्ति ।

इन्द्रियस्याव-रुद्ध्यै । त्रयाणि लोमानि । **16 (10)**

**T.B.1.8.5.3**

त्विषिमेवाव रुन्धे । त्रयो ग्रहाः । वीर्यमेवाव रुन्धे । नाम्ना दशमी ।

नव वै पुरुषे प्राणाः । नाभिर्दशमी । प्राणा इन्द्रियं ँवीर्यम् ।

प्राणानेवेन्द्रियं ँवीर्यं ँयजमान आत्मन्-धत्ते । सीसेन

क्लीबाच्छष्पाणि क्रीणाति । न वा एतदयो न हिरण्यम् । **17 (10)**

**T.B.1.8.5.4**

यथ्-सीसम् । न स्त्री न पुमान् । यत्-क्लीबः । न सोमो न सुरा ।

यथ्-सौत्रामणी समृद्ध्यै । स्वाद्वीं त्वा स्वादुनेत्याह ।

सोममेवैनां करोति । सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै

पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेत्याह । एताभ्यो ह्येषा देवताभ्यः पच्यते ।

तिस्रः सꣳसृष्टा वसति । **18 (10)**

**T.B.1.8.5.5**

तिस्रो हि रात्रीः क्रीतः सोमो वसति ।

पुनातु ते परिस्रुतमिति यजुषा पुनाति व्यावृत्त्यै । पवित्रेण पुनाति ।

पवित्रेण हि सोमं पुनन्ति । वारेण शश्वता तनेत्याह ।

वारेण हि सोमं पुनन्ति । वायुः पूतः पवित्रेणेति नैतया पुनीयात् ।

व्यृद्धा ह्येषा । अतिपवितस्यैतया पुनीयात् ।

कुविदङ्गे–त्यनिरुक्तया प्राजापत्यया गृह्णाति । **19 (10)**

**T.B.1.8.5.6**

अनिरुक्तः प्रजापतिः । प्रजापतेराप्त्यै । एकयर्चा गृह्णाति ।

एकधैव यजमाने वीर्यं दधाति । आश्विनं धूम्रमा लभते ।

अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति ।

सारस्वतं मेषम् । वाग्वै सरस्वती । वाचैवैनं भिषज्यति ( ) ।

ऐन्द्रमृषभꣳ सेन्द्रत्वाय ॥ **20 (11)** **(अक्ष्योर् – लोमानि – हिरण्यं – ँवसति – गृह्णाति – भिषज्यत्येकं च)** *(A5)*

## 1.8.6 अनुवाकं 6 – सौत्रामणिः, पशवः, हवींषि च

**T.B.1.8.6.1**

यत्–त्रिषु यूपेष्वा–लभेत । बहिर्द्धा ऽस्मादिन्द्रियं ँवीर्यं दध्यात् ।

भ्रातृव्यमस्मै जनयेत् । एकयूप आलभते ।

एकधैवास्मि–न्निन्द्रियं ँवीर्यं दधाति । नास्मै भ्रातृव्यं जनयति ।

नैतेषां पशूनां पुरोडाशा भवन्ति । ग्रहपुरोडाशा ह्येते ।

युव ँ सुराममश्विनेति सर्वदेवत्ये याज्यानुवाक्ये भवतः ।

सर्वा एव देवताः प्रीणाति । **21 (10)**

**T.B.1.8.6.2**

ब्राह्मणं परिक्रीणीया–दुच्छेषणस्य पातारम् । ब्राह्मणो ह्याहुत्या

उच्छेषणस्य पाता । यदि ब्राह्मणं न विन्देत् । वल्मीकवपायामव नयेत् ।

सैव ततः प्रायश्चित्तिः । यद्–वै सौत्रामण्यै व्यृद्धम् । तदस्यै

समृद्धम् । नानादेवत्याः पशवश्च पुरोडाशाश्च भवन्ति समृद्ध्यै ।

ऐन्द्रः पशूनामुत्तमो भवति । ऐन्द्रः पुरोडाशानां प्रथमः । **22 (10)**

**T.B.1.8.6.3**

इन्द्रिये एवास्मै समीची दधाति ।

पुरस्ता–दनूयाजानां पुरोडाशैः प्रचरति । पशवो वै पुरोडाशाः ।

पशूनेवाव रुन्धे । ऐन्द्र-मेकादशकपालं निर्वपति ।

इन्द्रियमेवाव-रुन्धे । सावित्रं द्वादशकपालं प्रसूत्यै ।

वारुणं दशकपालम् । अन्तत एव वरुणमव-यजते ।

वडबा दक्षिणा । **23 (10)**

**T.B.1.8.6.4**

उत वा एषाऽश्वꣳ सूते । उताश्वतरम् । उत सोम उत सुरा ।

यथ्-सौत्रामणी समृद्ध्यै ।

बार्.हस्पत्यं पशुं चतुर्थ-मतिपवितस्यालभते ।

ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैव यज्ञस्य व्यृद्धमपि-वपति ।

पुरोडाशवानेष पशुर्भवति । न ह्येतस्य ग्रहं गृह्णन्ति ।

सोमप्रतीकाः पितर-स्तृप्णुतेति शतातृण्णायाꣳ समवनयति । **24 (10)**

**T.B.1.8.6.5**

शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति ।

दक्षिणेऽग्नौ जुहोति । पापवस्यसस्य व्यावृत्त्यै । हिरण्यमन्तरा धारयति ।

पूतामेवैनां जुहोति । शतमानं भवति । शतायुः पुरुषः शतेन्द्रियः ।

आयुष्येवेन्द्रिये प्रति तिष्ठति । यत्रैव शतातृण्णां धारयति । **25 (10)**

**T.B.1.8.6.6**

तन्निदधाति प्रतिष्ठित्यै । पितृन्. वा एतस्येन्द्रियं ँवीर्यं गच्छति ।

य७् सोमोऽतिपवते । पितृणां ँयाज्या-नुवाक्याभिरुप तिष्ठते ।

यदेवास्य पितृनिन्द्रियं ँवीर्यं गच्छति । तदेवाव रुन्धे ।

तिसृभिरुप तिष्ठते । तृतीये वा इतो लोके पितरः । तानेव प्रीणाति ।

अथो त्रीणि वै यज्ञस्येन्द्रियाणि ( ) । अद्ध्वर्युर्.-होता ब्रह्मा ।

त उपतिष्ठन्ते । यान्येव यज्ञस्येन्द्रियाणि ।

तैरेवास्मै भेषजं करोति ॥ **26 (14)** ***(प्रीणाति - प्रथमो - दक्षिणा - समवनयति - धारय - तीन्द्रियाणि चत्वारि च)*** *(A6)*

## 1.8.7 अनुवाकं 7 - राजसूयस्याग्रे कर्तव्यं पवित्राख्यमग्निष्टोममहः

**T.B.1.8.7.1**

अग्निष्टोममग्र आहरति । यज्ञमुखं ँवा अग्निष्टोमः ।

यज्ञमुखमेवारभ्य सवमाक्रमते ।

अथैषो-ऽभिषेचनीय-श्चतुस्त्रि७्शपवमानो भवति ।

त्रयस्त्रि७्शद्वै देवताः । ता एवाप्नोति । प्रजापति-श्चतुस्त्रि७्शः ।

तमेवाप्नोति । स॒ꣳश॒र ए॒ष स्तोमाना॒मयथापूर्वम् ।

यद्-विषमा॒ः स्तोमाः । **27 (10)**

**T.B.1.8.7.2**

ए॒ताव॒ान्॒. वै य॒ज्ञः । याव॒ान्-पवमानाः । अ॒न्त॒ः श्लेष॒णं त्वा अ॒न्यत् ।

यथ्-स॒माः पवमानाः । तेनासꣳशरः । तेन यथापू॒र्वम् ।

आ॒त्मनै॒-वाग्निष्टो॒मे॒नर्द्ध्नोति । आ॒त्मना॒ पुण्यो भवति ।

प्र॒जा वा उ॒क्थानि । प॒शव उ॒क्थानि( ) ।

यदु॒क्थ्यो भव॒त्यनु॒ संतत्यै ॥ **28 (11)**

*(स्तोमाः-प॒शव उ॒क्थान्येकं च) (A7)*

### 1.8.8 अनुवाकं 8 – अभिषेचनीये साममन्त्रविशेषः

**T.B.1.8.8.1**

उप त्वा जा॒मयो॒ गि॒र इति प्रति॒पद्भवति । वाग्वै वा॒युः ।

वा॒च ए॒वैषो॒ऽभिषे॒कः । सर्वासामे॒व प्र॒जानाꣳ सूयते ।

सर्वा एनं प्र॒जा राजेति वदन्ति । ए॒तमु॒ त्यं द॒शक्षि॒प इत्याह ।

आ॒दि॒त्या वै प्र॒जाः । प्र॒जानामे॒वैतेन सूयते । यन्ति॒ वा ए॒ते यज्ञमु॒खात् ।

ये सम्भा॒र्या अक्रन्न् । **29 (10)**

**T.B.1.8.8.2**

यदाह पवस्व वाचो अग्रिय इति । तेनैव यज्ञमुखान्–नयन्ति ।

अनुष्टुक्–प्रथमा भवति । अनुष्टु–गुत्तमा । वाग्वा अनुष्टुक् ।

वाचैव प्रयन्ति । वाचोद्यन्ति । उद्वतीर्–भवन्ति । उद्वद्वा अनुष्टुभो रूपम् ।

आनुष्टुभो राजन्यः । **30 (10)**

**T.B.1.8.8.3**

तस्मादुद्वतीर्–भवन्ति । सौर्यनुष्टु–गुत्तमा भवति ।

सुवर्गस्य लोकस्य संतत्यै । यो वै सवादेति । नैन৺ सव उपनमति ।

यः सामभ्य एति । पापीयान्थ्–सुषुवाणो भवति ।

एतानि खलु वै सामानि । यत्पृष्ठानि । यत्पृष्ठानि भवन्ति । **31 (10)**

**T.B.1.8.8.4**

तैरेव सवान्नैति । यानि देवराजाना৺ सामानि ।

तैरमुष्मिन् ँल्लोक ऋद्ध्नोति । यानि मनुष्यराजाना৺ सामानि ।

तैरस्मिन् ँल्लोक ऋद्ध्नोति ।

उभयोरेव लोकयोर्.–ऋद्ध्नोति । देवलोके च मनुष्यलोके च ।

एकवि৺शो ऽभिषेचनीय–स्योत्तमो भवति । एकवि৺शः

केशवपनीयस्य प्रथमः । सप्तदशो दशपेयः । **32 (10)**

**T.B.1.8.8.5**

विड्वा एकवि॒ꣳशः । राष्ट्र॒ꣳ सप्तद॒शः ।

विश ए॒वैतन्-मद्ध्य॒तोऽभिषिच्यते । तस्मा॒द्वा ए॒ष वि॒शां प्रि॒यः ।

वि॒शो हि मद्ध्य॒तोऽभिषि॒च्यते । यद्वा एनम॒दो दिशोऽनु व्यास्था॒पयन्ति ।

तथ्-सु॒वर्गं ँलो॒क-म॒भ्यारोहति । यदि॒मं ँलो॒कं न प्रत्य॒वरोहेत् ।

अ॒ति॒ ज॒नं ँवे॒यात् । उद्वा माद्येत् ( ) । यदे॒ष प्रती॒चीन-स्तोमो॒ भवति ।

इ॒ममे॒व तेन लो॒कं प्र॒त्यवरोहति ।

अथो अ॒स्मिन्ने॒व लो॒के प्रति तिष्ठ॒त्य-नुन्मादाय ॥ **33 (13)**

***(अक्रन् - राज॒न्यो - भवन्ति - द॒शपेयो - मा॒द्येत् त्रीणि च) (A8)***

## 1.8.9 अनुवाकं 9 - अभिषेचनीयविषययो रुक्मयोः स्तुतिः

**T.B.1.8.9.1**

इ॒यं ँवै रज॒ता । अ॒सौ हरिणी । यद्-रु॒क्मौ भवतः ।

आ॒भ्यामे॒वैन-मु॒भ॒य॒तः परि गृह्णाति । वरुणस्य॒ वा अभिषि॒च्यमा॒नस्यापः ।

इ॒न्द्रि॒यं ँवी॒र्यं निरघ्नन्न् । तथ्-सु॒वर्ण॒ꣳ हिरण्य-मभवत् ।

यद्-रु॒क्म-मन्त॒र्-दधाति । इ॒न्द्रि॒यस्य वी॒र्यस्यानिर्घाताय ।

श॒तमानो भवति श॒तक्षरः ( ) । श॒ता॒युः पुरुषः श॒तेन्द्रियः ।

आयुष्येवेन्द्रिये प्रति तिष्ठति । आयुर्वै हिरण्यम् ।

आयुष्या एवैन–मभ्यति क्षरन्ति । तेजो वै हिरण्यम् ।

तेजस्या एवैनमभ्यति क्षरन्ति । वर्चो वै हिरण्यम् ।

वर्चस्या एवैनमभ्यति क्षरन्ति ॥ **34 (18)** *(शतक्षरोऽष्टौ च) (A9)*

## 1.8.10 अनुवाकं 10 – व्युष्टिद्विरात्रं राजसूयान्ते कर्तव्यम्

**T.B.1.8.10.1**

अप्रतिष्ठितो वा एष इत्याहुः । यो राजसूयेन यजत इति ।

यदा वा एष एतेन द्विरात्रेण यजते । अथ प्रतिष्ठा ।

अथ सम्ँवथ्सरमाप्नोति । यावन्ति सम्ँवथ्सरस्या–होरात्राणि ।

तावतीरेतस्य स्तोत्रीयाः । अहोरात्रेष्वेव प्रति तिष्ठति ।

अग्निष्टोमः पूर्वमहर्–भवति । अतिरात्र उत्तरम् । **35 (10)**

**T.B.1.8.10.2**

नानैवाहोरात्रयोः प्रति तिष्ठति । पौर्णमास्यां पूर्वमहर्–भवति ।

व्यष्टकाया–मुत्तरम् । नानैवार्द्ध मासयोः प्रतितिष्ठति ।

अमावास्यायां पूर्वमहर्–भवति । उद्दृष्ट उत्तरम् ।

नानैव मासयोः प्रति तिष्ठति । अथो खलु ।

ये एव समानपक्षे पुण्याहे स्याताम् ।

तयोः कार्यं प्रतिष्ठित्यै । **36 (10)**

**T.B.1.8.10.3**

अपशव्यो द्विरात्र इत्याहुः । द्वे ह्येते छन्दसी । गायत्रं च त्रैष्टुभं च ।

जगतीमन्तर्यन्ति । न तेन जगती कृतेत्याहुः ।

यदेनां तृतीयसवने कुर्वन्तीति । यदा वा एषाऽहीनस्याहर् भजते ।

साह्नस्य वा सवनम् । अथैव जगती कृता । अथ पशव्यः ( ) ।

व्युष्टिर्वा एष द्विरात्रः । य एवं ँविद्वान् द्विरात्रेण यजते ।

व्येवास्मा उच्छति । अथो तम एवापहते । अग्निष्टोम-मन्तत आहरति ।

अग्निः सर्वा देवताः । देवतास्वेव प्रति तिष्ठति ॥ **37 (17)**

*(उत्तरं - प्रतिष्ठित्यै - पशव्यः सप्त च) (A10)*

=================

**Prapaataka Korvai with starting Words of 1 to 10 Anuvaakams :-**

(वरुणस्य – जा – मीश्वर – आग्नेय – मिन्द्रस्य – यत् त्रि – ष्वग्निष्टोम – मुप त्वे – यं वै रजता – ऽप्रतिष्ठितो दश)

**Korvai with starting Words of 1, 11, 21 Series of Dasinis :-**

(वरुणस्य – यदश्विभ्यां – यत् त्रिषु – तस्मादुद्वतीः सप्तत्रिꣳशत्)

**First and Last Word of 8th Prapaatakam :-**

वरुणस्य – प्रति तिष्ठति ।

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके अष्टमः प्रपाठकः समाप्तः ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्कं समाप्तम् ॥

## Details of Dasini & Vaakyams for Ashtakam 1 Prapaatakam 8 (TB 1.8)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 2 | 25 |
| Anuvakam 2 | 5 | 57 |
| Anuvakam 3 | 4 | 42 |
| Anuvakam 4 | 3 | 31 |
| Anuvakam 5 | 6 | 61 |
| Anuvakam 6 | 6 | 64 |
| Anuvakam 7 | 2 | 21 |
| Anuvakam 8 | 5 | 53 |
| Anuvakam 9 | 1 | 18 |
| Anuvakam 10 | 3 | 37 |
| Total → | 37 | 409 |

# Details for Full Ashtakam 1

| | Anuvaakam | Dasini | Vaakyams |
|---|---|---|---|
| Prapaatakam 1 | 10 | 80 | 831 |
| Prapaatakam 2 | 6 | 50 | 511 |
| Prapaatakam 3 | 10 | 65 | 666 |
| Prapaatakam 4 | 10 | 66 | 690 |
| Prapaatakam 5 | 12 | 62 | 662 |
| Prapaatakam 6 | 10 | 76 | 786 |
| Prapaatakam 7 | 10 | 64 | 677 |
| Prapaatakam 8 | 10 | 37 | 409 |
| Total → | 78 | 500 | 5232 |